VYAS PANCHANG

ज्योतिष-पंचांग-पूजा पाठ एवं ज्योतिष परामर्श

बालागाम,ता.केशोद,जिला.जूनागढ़,गुजरात,भारत(इन्डिया) पिन:362220

www.vyaspanchang.com, help@vyaspanchang.com, MO.NO.94087 28736 (11 AM TO 06 PM)

॥ कूश्माण्डहोमविधिः ॥

संस्कृत

VYAS PANCHANG

॥ श्रीः ॥

श्रीजगद्गुरु अभिनवविद्यातीर्थस्वामि वेदविद्यापरिशीलनमण्डले
शुभकृदाश्वयुजमासे वर्धन्तीमहोत्सवे प्रकाशितः

॥ कूश्माण्डहोमविधिः ॥

प्रातस्स्नानादिप्रकारसहितः

मीमांसाशिरोमणिना वेदविद्यापरिशीलनमण्डलाध्यापकेन
ब्रह्मश्री सुन्दरराम दीक्षितेन
सङ्कलितः

प्रकाशकः-
श्रीवेदविद्यापरिशीलनमण्डल-
कार्यदर्शी
नवसुजा, राजा अण्णामलैपुरम्
मद्रपुरी. २८

[मूल्यम् रू. १-५०.

வ

வர்த்தந்தி விழா வெளியீடு - 2.

ஸ்ரீ ஜகத்குரு அபிநவ வித்யாதீர்த்த ஸ்வாமிகள்
வேதவித்யா பரிசீலன மண்டலி

கூஷ்மாண்ட ஹோமவிதி

ப்ராதஸ்நான முறை முதலியவற்றுடன் கூடியது

பக்ஷிதீர்த்தம், மீமாம்ஸாசிரோமணி,
ஷ மண்டலாத்யாபகரான ப்ரம்ஹஸ்ரீ
ஸுந்தரராம தீக்ஷிதரால்
தொகுக்கப்பட்டது

பிரசுரிப்பவர்:

கார்யதர்சி
வேதவித்யா பரிசீலன மண்டலி
நவஸுஜா, ராஜா அண்ணுமலிபுரம், மதராஸ் - 28.

சுபகிருத் வருஷம் ஐப்பசி மாதம் 11வ
1962

[விலை. ரூ. 1-50.

முதற் பதிப்பு—1000 பிரதிகள்.

॥ श्री शृङ्गगिरि जगद्गुरु श्री अभिनवविद्यातीर्थ महास्वामिनः ॥

ஸ்ரீ ஜகத்குரு ச்ருங்ககிரி
ஸ்ரீ அபிநவ வித்யாதீர்த்த மஹாஸ்வாமிகள்.

श्री जगद्गुरु महासंस्थानं, शारदापीठम्
शृङ्गेरि-कडूर् (मैसूर्स्टेट्)

Sri Jagadguru Mahasamasthanam

Sharada Peetham

Sringeri—Kadur (Mysore State)

Office of the Private Secretary
To His Holiness the Jagadguru of
Sri Sringeri Mutt, Sringeri—Kadur

N. LAKSHMINARAYANA SASTRY
Private Secretary.

Camp: SRINGERI
Date : 18th Oct.'62

Ref. No. BL. 1752-62.

To

SRI VAIDYASUBRAMANYAM, B.A.
"NAVASUJA"
RAJA ANNAMALAIPURAM, MADRAS-28.

DEAR SIR,

His Holiness was glad to know that Shri Jagadguru Vidyatheertha Mahaswamigal Veda Vidya Pariseelana Mandali intends to release a book on "**Kushmanda Homam**" on the day of the vardhanthi celebrations, with a preface by Bramhasri Sengalipuram Anantharama Dikshatar.

His Holiness feels that this will be a publication useful to many and conveys His Blessings for success in your efforts.

Asir Manthrakshata and Sri Sarada Chandramouleeswara Prasadams are herewith sent.

With regards,

Yours sincerely,
Sd. N. LAKSHMINARAYANA SASTRY,
Private Secretary.

/True copy/

॥ श्रीराम जयः ॥

மங்களங்களை அளிக்கும் கூஷ்மாண்ட ஹோமம்

ஸ்ரீ பகவான் இவ்வுலகை படைத்தவர். மனிதர்களை நல்வாழ்க்கையை நடத்தும்படி உபதேசித்தவர். அந்த உபதேசங்களே வேதங்கள் எனப்படும். நமது மனித வர்ழ்க்கையில் பல துன்பங்கள் நேரக்கூடும். அவைகளை போக்கிக்கொள்ள வழிகளும் வேதங்களில் கூறப்பட்டுள்ளன. அம்மாதிரி துன்பங்கள் வருவதற்கு காரணம், இந்த ஜென்மத்திலோ முன் ஜென்மத்திலோ செய்த கெட்ட கர்மாக்களேயாகும். அதனால் வியாதிகளும் துக்கங்களும், கடன் முதலிய துன்பங்களும் அகாலத்தில் மரணம் முதலியவைகளும் நேரிடக்கூடும். இம்மாதிரியான கெட்ட கர்மாவின் பயன்கள் வராமல் தடுத்துக் கொள்ள கூஷ்மாண்ட ஹோமமென சிறந்த கர்மாவை வேதம் கூறியுள்ளது. கூஷ்மாண்டமென இந்த மந்திரங்களின் பெயர்.

மேலும் இந்த ஹோமத்தை உபநயனம் விவாகம் முதலிய நல்ல கர்மாக்கள் செய்வதற்கு முன் தினமும் செய்யவேண்டும். வேதமே **कर्मादिष्वेतैर्जुहुयात्** எனக் கூறியுள்ளது. இன்னும் எப்பொழுதாவது ஒருவன், தான் ஏதாவது பாபத்தை செய்துவிட்டேனே அதனால் தனக்கு சுத்தமற்ற தன்மை வந்திருக்குமோ என சந்தேகப் பட்டால் அப்பொழுதும் இந்த ஹோமத்தை **कूश्माण्डै-र्जुहुयाद्योऽपूत इव मन्येत** என்றதால் கூறியுள்ளது.

பஞ்சமஹாபாபத்திற்கு ஸமமான பாபங்கள் இந்த ஹோமத்தால் விலகும். அதாவது கெட்டநடை முதலிய செயல்களால் ஏற்பட்ட பாபங்கள் விலகுமென வேதமே கூறியுள்ளது. அதாவது **यथा स्तेनो यथा भ्रूणहैवमेष भवति योऽयोनौ रेतस्सिञ्चति, यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान्मुच्यते**, எப்படி ஸ்வர்ணத்தை திருடியவன் மஹாபாபியோ,

எப்படி ப்ரூணஹ (மூன்று வேதம் கற்றவஹ) கொன்ற வன் மஹாபாபியோ **एवमेषभवति** கெட்ட செயல் புரிந்தவன் இந்த மஹாபாபிகளுக்கு ஸமமாகிறான் என்றதால் அவர்கள் செய்த பாபத்தைக்காட்டிலும் கீழ்ப்பட்ட பாபங்கள் யாவும் நீங்குமென இந்த வேதத்தின் பொருள்.

ஆதலால்தான் பெரியோர்கள் இந்த கூஷ்மாண்ட ஹோமத்திற்கு ஸங்கல்பம் சொல்லும்போது **भ्रूणहत्याया: अर्वाञ्चि यावन्ति एनांसि संभवन्ति तावतां एनसां निर्हरणार्थं** என்று சொல்வது வழக்கம். இதன் பொருள், ப்ரூணஹத்திக்கு (மூன்று வேதம் கற்றவஹ கொன்றதற்கு) கீழ்ப்பட்டுள்ள எந்த பாபங்கள் உண்டோ அவ்வளவு பாபங்களையும் போக்கிக்கொள்ள இந்த ஹோமத்தை செய்கிறேன் என்று.

இந்த ஹோம மந்திரங்களில் பல பாபங்களை நீக்கும் படி வேண்டப்பட்டிருக்கிறது. முதலில் தெய்வத்திற்கு கோபம் வரக்கூடிய தப்புக்களையும், இரண்டாவது மந்திரத்தில் பிழைப்புக்காக (குடும்பம் நடத்துவதற்காக) வாக்கினால் சொல்லிய பொய்யால் ஏற்பட்ட பாபங்கள் நீங்கவேண்டும் என்பதையும் இன்னும் பல மந்திரங்களில் கடன் வாங்கிக்கொண்டு கொடுக்காமலிருந்து அதனால் ஏற்பட்ட பாபங்கள் நீங்க வேண்டியதையும், இந்த ஜன்மத்திலேயே, நிறைய பொருள்களை அடைந்து அந்த கடனை கொடுக்கும்படி செய்யவேண்டு மென்பதையும் வேண்டப்பட்டுள்ளது.

மற்றொரு ஹோம மந்திரத்தில் **यद्वाचा यन्मनसा बाहुभ्या मूरुभ्या मष्ठीवद्भ्याꣳशिश्नैर्यदनृतं चकृमावयम् । अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु चकृम यानि दुष्कृता ॥** சொல் முதலியவற்றால் ஏற்பட்ட பாபங்கள் விலக வேண்டுமென கோரப்பட்டுள்ளது. இதற்கு ஸ்ரீ வித்யாரண்யர் அர்த்தம் கூறுமிடத்தில் **वाचा** வாக்கினால் சொல்லிய பொய் பெரியோர்களை நீ என்று சொல்வது முதலியவைகள் **मनसा** பிறருக்குத் தீங்கு நினைத்தல் **बाहुभ्यां** கைகளால் வேதமறிந்த பெரியோர்களை அடித்தல் முதலியவைகள் **ऊरुभ्यां** துடைகளால் செய்த அகம்யாலிங்கனம் முதலியவைகள், **अष्ठीवद्भ्यां** முழங்கால்களால் (அதாவது கால்

களால்) செல்லக்கூடாத இடத்திற்கு செல்லுதல் முதலியவைகள், शिश्नैः அயோநியில் ரேதஸ்ஸேகம் முதலியவைகள், இவற்ருல் ஏற்பட்ட எல்லா பாபங்களும் விலக வேண்டுமென்றும், शिश्नैः என்ற பன்மையால் கண் முதலியவைகளால் செய்யப்பட்ட பாபங்களும் விலக வேண்டுமெனவும் விவரித்துள்ளார்.

மற்ருெரு ஹோம மந்திரத்தில் நான் குழந்தையாக இருக்கும்போது ஸ்தன்ய பானம் செய்யும்போது தாயை பற்களால் கடித்திருப்பேன். தகப்பனுருக்கும் ஏதாவது துன்பத்தை உண்டுபண்ணியிருப்பேன். அவைகள் நீங்க வேண்டுமென கோரப்பட்டுள்ளது.

மேலும் सङ्कुसुको विकुसुको निरृथो यश्चनिस्वनः। என்றதால் பிறரைப்பற்றி குற்றங்கூறி பலரிடம் இதைஅடிக்கடி சொல்லி அதனுல் ஏற்பட்டதும், கோழிச் சொல்லிக் கொடுத்ததால் ஏற்பட்டதுமான பாபங்கள் மூலம் சில ரோகங்கள் உண்டாகும். அந்தப் பாபம் ரோகம்இவற்றை போக்க வேண்டுமென வேண்டப்படுகிறது.

निर्यक्ष्ममचीचते कृत्यां निरृतिञ्च। இன்னும் பல ரோகங்களை அளிக்கும் பாபங்களையும் அந்த பாபத்தால்ஏற்பட்ட ரோகத்தையும் அலக்ஷ்மியையும் (ஏழ்மையையும்) போக்க வேண்டுமென வேண்டப்படுகிறது.

மேலும் संवर्चसा पयसा सन्तनूभिरगन्महि मनसास शिवेन। ஹோம மந்திரத்தில் நல்ல சரீர பலம், நல்ல பசுக்கள் மூலம் பால், நல்ல சரீரம் நல்ல மனம் இவற்றை நாங்கள் அடையவேண்டும், இன்னும் ஏதாவது மிஞ்சிய பாபத்தை த்வஷ்டா அடியோடு போக்கவேண்டுமென வேண்டப்படுகிறது.

இப்படிப் பல பாபங்கள் விலக வேண்டுமென வேண்டப்பட்டது. இந்த மந்திரங்களில் சொல்லிய பாபங்கள் யாவையும் பகுத்தறிவற்றவர்கள் செய்திருக்கக் கூடும். விவேகிகள் கூட சில பாபங்களை தெரிந்தோ தெரியாமலோ செய்திருக்கக்கூடும். இவைகள் எல்லாம் இந்த ஹோமத்தால் நீங்குகின்றன.

பிறகு கடைசியில் மனைவியும் தானும், ஸமித்துக்களை கையில் வைத்துக்கொண்டு குறுக்காக அக்னியைப்

பார்த்து நின்றுகொண்டு வேண்டப்படும் மந்திரங்கள் பல பாபங்களை நீக்குவதாக அமைந்துள்ளன. இந்த மந்திரங்களின் முடிவில் यन्मया मनसा वाचा कृतमेनः कदाचन। எப்பொழுதாவது என்னுல் மனதினுலோ, வாக்கினுலோ செய்யப்பட்ட எல்லா பாபங்களும் விலகவேண்டுமென வேண்டி ஸமித்துக்களை அக்னியில் வைக்கவேண்டும். இந்த மந்திரங்களைச் சொல்லி ஹோமம் செய்து வேண்டி னுலே பாபங்கள் நீங்கிவிட்டது தங்கள் மனதிற்கே நன்கு புலப்படும்.

இந்த மந்திரங்களை நல்ல வேதவித்தான ஆசார்யா னிடம் முன்பு ஸ்வரத்துடன் கற்றுக்கொண்டு செய்வது ரொம்பவும் நலம். அல்லது பதம் பதமாக சொல்லச் செய்து தான் சொல்லியும் செய்யலாம். இதற்கு சிலவு மிகவும் குறைவென்றே சொல்லவேண்டும். ப்ரும்ம வரணம் செய்து பசுவை அவருக்கு தானமாக கொடுக்கும் படி வேதம் கூறியுள்ளது. அப்படி முடியாவிடில் பசுவுக்கு பதிலாக தேங்காயுடன் பொருளை கொடுப்பது வழக்கம். சக்தி உள்ளவர்கள் நிறையத்தான் கொடுக்கவேண்டும். மேலும் இந்த ஹோமத்திற்கு முன்பு அனுக்ஞை முதலியவைகளும் நமது மங்கள பித்ருக்களுக்கு நாந்தியும் செய்யவேண்டும். நாந்தியிலும் வஸ்திரம் முதலியவைகள் நிறையக் கொடுத்து செய்யலாம். சக்தி இல்லாதவர்கள் நன்கு வேதமறிந்த ஒருவரை வைத்துக்கொண்டே எல்லா வற்றையும் செய்துவிடலாம். மேன்மேலும் துக்கங்களை அளிக்கும் பாபங்கள் இந்த கூஷ்மாண்ட ஹோமத்தால் விலகுகின்றன. இதற்காக எவ்வளவு வேண்டுமானுலும் தானம் செய்யலாம். இப்படிப்பட்ட உத்தம கர்மாக்களை நமது பெரியோர்கள் பிரதி வருஷமும் பலதடவைகள் செய்வது வழக்கம்.

இம்மாதிரி முறைகள் எல்லாம் குறைந்த இக் காலத்தில் உலகத்திலுள்ள ஆஸ்திகர்களின் நன்மைக்காக இந்த கூஷ்மாண்ட ஹோம மந்திரங்களை ப்ராசீனமான பெரியோர்கள் செய்துவரும் முறைப்படி நல்ல வேத வித்தும் மீமாம்ஸா சாஸ்திரத்தை நன்கு கற்றறிந்து பட்டம் பெற்றவரும் நல்ல ஆசாரத்துடன் இருந்து கொண்டும் விளங்குகின்ற பக்ஷிதீர்த்தம். (திருக்கழு குன்றம்) ப்ரம்ம ஸ்ரீ ஸுந்தரராம தீக்ஷிதர் அவர்கள் மூலம் எழுதச் செய்து வெளியிடுவது மிகவும் போற்றத்தக்க தாகும்.

மேலும் ப்ராதஸ்நானம் முதலிய ஸத்கர்மாக்களையும் செய்யவேண்டிய முறைப்படி இதில் எழுதப்பட்டுள்ளன. ஸ்ரீ தீக்ஷிதர் அவர்களும், இவர்கள் தமயனார் அவர்களும் நன்கு கற்றறிந்தவர்கள். சிறந்த அக்னிஹோத்ரிகளின் குடும்பத்தில் பிறந்தவர்கள். இவர்கள் எழுதியுள்ள முறை யாவருக்கும் சுலபமாய் அறியக்கூடிய விதத்தில் அமைந்துள்ளன. உபநயனமான ஒவ்வொரு ப்ராம்மணனும் இந்த புஸ்தகத்தை வாங்கிப் படிக்கவேண்டும்.

இப்படி இவர்களை எழுதச்செய்து ப்ரசுரம் செய்ய முன்வந்தவர், மிகுந்த புண்ய புருஷர். தான் அனுஷ்டிக்க வேண்டுமென்று ஆவல்கொண்டு பலமுறைகள் தானே இந்த கூஷ்மாண்ட ஹோமத்தை செய்தவர். ஸ்ரீ ஜகத்குரு பரமாச்சார்யாளிடத்திலும் மற்றுமுள்ள பெரியோர்களிடத்திலும் அளவுகடந்த பக்தியுள்ளவர். பல தர்மங்களை ஆடம்பரமின்றி செய்து வருகின்றவர். ஏதோ ஒரு ஸமயத்தில் உபன்யாஸத்தில் இந்த கூஷ்மாண்ட ஹோமத்தின் பெருமையை நான் கூறியதை ச்ரவணம் செய்ததின் மூலம் பலமுறை இவர் அனுஷ்டித்து வருகிறவர். இப்படிப்பட்ட சிறந்த ஆஸ்திகர் ஸ்ரீ வைத்திய ஸுப்ரமண்ய அய்யர். இவர்கள் செய்த இந்த உதவியை ஆஸ்திக உலகம் மறக்கவே முடியாது. நித்யம் பல ஆஸ்திகர்களுடன் வேதத்தை முறைப்படி கற்றுக் கொண்டும் அதன் அர்த்தத்தை ச்ரவணம் செய்து வருவதும் மிகவும் ஆச்சரியப்படத் தகுந்தது. இவர்களுக்கு ஸகல மங்களங்களையும் ஸ்ரீ பகவான் கொடுத்து அருளவேண்டுமென வேண்டுகிறேன்.

இப்படிக்கு,

உபன்யாஸ சக்ரவர்த்தி

சேங்காலிபுரம் அநந்தராம தீக்ஷிதர்

ஸ்ரீ குருப்யோ நம:

முகவுரை

ஸ்ரீ ஜகத்குரு மஹாஸன்னிதானம் ச்ருங்ககிரி சாரதா பீடாதிபதியவர்கள் சென்னை விஜயம் செய்தபோது அவர்களின் அவதார தினத்தன்று ஆரம்பிக்கப்பட்ட ''ஸ்ரீ ஜகத்குரு வித்யாதீர்த்த மஹா ஸ்வாமிகள் வேத வித்யா பரிசீலன மண்டலியின்'' ஆதரவில் இவ் வருஷமும் ஸ்ரீ ஜகத்குரு அவர்களின் வர்தந்தி கொண்டாடப்படுகிறது. சென்ற வருஷத்தில் இந்த மண்டலியில், தைத்திரீய ஆரண்யகத்தில் 2-வது ப்ரச்னம் அத்யயனம் செய்யப்பட்டிருக்கின்றது. சென்ற வருஷம் முதல்ப்ரச்னத்தை ஸ்ரீ ஸூர்யநமஸ்காரகல்பம் என்ற புஸ்தகமாக வெளியிட்டது போல் இவ்வருஷம் கூச்மாண்டஹோம மந்தரங்களையும் சேர்த்து ஷை மண்டலியின் அத்யாபகராகிய பக்ஷீதீர்த்தம் ப்ரம்ஹ ஸ்ரீ ஸுந்தரராம தீக்ஷிதர் அவர்களால் தொகுக்கப்பட்டு இப்புஸ்தகம் ஸ்ரீ ஜகத்குரு அவர்களின் ஆசியுடனும் ப்ரம்ஹஸ்ரீ உபன்யாஸ சக்ரவர்த்தி சேங்காலிபுரம் அனந்தராம தீக்ஷிதர் அவர்களுடைய முன்னுரையுடனும் வெளியிடப்படுகிறது. இப்புஸ்தகத்தை ஆஸ்திகர்கள் அனைவரும் உபயோகித்து அதில் விதிக்கப்பட்டிருக்கும் கர்மாக்களை அனுஷ்டித்து பூதத்வம் அடையவேணுமாய் ஸர்வேச்வரனைப் பிரார்த்திக்கிறேன்.

காரியதர்சி,

ஸ்ரீஜகத்குரு ஸ்ரீவித்யாதீர்த்த மஹாஸ்வாமிகள் வேதவித்யாபரிசீலன மண்டலி.

20—10—62.

विषयानुक्रमणिका

१	प्रातस्स्नानविधिः	१
२	यज्ञोपवीतधारणम्	८
३	अग्निसन्धानम्	८
४	तत्र, प्रकारान्तरम्	१३
५	औपासनम्	१७
६	तत्र, नित्यौपासनविधिः	२०
७	विघ्नेश्वरपूजा	२१
८	ग्रहप्रीतिः	२३
९	अभ्युदयः	,,
१०	पुण्याहवाचनम्	२४
११	पञ्चगव्यसम्मेळनम्	३२
१२	श्रुत्युक्तः कूश्माण्डहोमविधिः	३६
१३	जमदग्निप्रोक्तः ,,	३८
१४	बोधायन प्रोक्तः ,,	३९
१५	कर्मविपाकोक्तः ,,	४०
१६	तदुपक्रमप्रकारः ,,	,,
१७	कूश्माण्डहोमप्रयोगः	४२
१८	(विभक्ताः) कूश्माण्डहोममन्त्राः	४६
१९	(अविभक्ताः) ,,	६०
२०	जयादिहोममन्त्रादिकम्	७५

॥ श्रीगुरुभ्यो नमः ॥

॥ कूश्माण्डहोमविधिः ॥

॥ प्रातस्स्नानादिप्रकारसहितः ॥

॥ प्रातस्स्नानविधिः ॥

ब्राह्मे मुहूर्ते प्रबुध्य, गुरुध्यानादीनि कृत्वा, आचम्य, स्नात्वा, सङ्कल्प-सूक्तपठनपुरस्सरं पुनः स्नायात् ।

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

ओम् भूः ओम् भुवः ओꣳसुवः ओम् महः ओम् जनः ओम् तपः ओꣳ सत्यम् ओम् तत्सॅवितुर्वरेण्यंभर्गो देवस्यॅ धीमहि । धियो यो नॅः प्रचोदयात् । ओमापो ज्योती रसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम्

ममोपात्तसमस्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं शुभे दिने शोभने मुहूर्ते अद्यब्रह्मणः द्वितीयपरार्धे श्वेतवराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमे पादे जम्बूद्वीपे भारतवर्षे भरतखण्डे मेरोः दक्षिणे पार्श्वे शालिवाहनशकाब्दे अस्मिन् वर्तमाने व्यावहारिके प्रभवादीनां षष्टयाः संवत्सराणां मध्ये..संवत्सरे.... अयने....ऋतौ....मासे....पक्षे..वासर....नक्षत्र....योग ....करणयुक्तायां अस्यां....शुभतिथौ ममो....र्थं....(नद्यादौ) प्रातस्स्नानमहं करिष्ये (इति सङ्कल्प्य, अप उपस्पृश्य)

अतिक्रूर महाकाय कल्पान्तदहनोपम ।
भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥
दुर्भोजनदुरालापदुष्प्रतिग्रहसम्भवम् ।
पापं हर मम क्षिप्रं जह्नुकन्ये नमोऽस्तु ते ॥
समस्तजगदाधार शङ्खचक्र गदाधर ।
देहि देव ममानुज्ञां युष्मत्तीर्थनिषेवणे ॥
त्वं राजा सर्वतीर्थानां त्वमेव जगतः पिता ।
याचितं देहि मे तीर्थं सर्वपापापनुत्तये ॥

इत्यादीन् श्लोकान् पठित्वा वरुणसूक्तं जपेत् ।

उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमश्रथाय ।
अथावयमादित्य व्रते तवानागसो अदितये स्याम ॥

अस्तभ्नाद्द्यामृषभो अन्तरिक्षममिमीत वरिमाणं पृथिव्या आसीद-
द्विश्वा भुवनानि सम्राड्विश्वेत्तानि वरुणस्य व्रतानि ॥

यत् किञ्चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्याश्चरामसि ।
अचित्ती यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः ॥

कितवासो यद्रिरिपुर्न दीवि यद्वाघासत्यमुत यन्न विद्म ।
सर्वा ता विष्य शिथिरेव देवाथा ते स्याम वरुण प्रियासः ॥

अव॑ ते हेडो॑ वरुण नमो॑भि रव॑यज्ञेभि॑रीमहे हविर्भि॑ः ।

क्षय॑न्नस्मभ्य॑मसुरप्रचेतो॑ राजन्नेना॑ॅंसि शिश्रथः कृता॑नि ॥

तत्त्वा॑ यामि ब्रह्म॑णा वन्द॑मानस्तदाशा॑स्ते यज॑मानो हविर्भि॑ः ।

अहे॑डमानो वरुणेह बो॑ध्युरु॑शꣳस मा न आयुः प्रमो॑षीः ॥

इति वरुणसूक्तं जपित्वा पुण्यतीर्थानि स्मरन् "आपो हि ष्ठा" द्यैर्मन्त्रैर्मार्जनं "हिरण्यशृङ्ग"मित्यघमर्षणजपञ्च कृत्वा पुनस्स्नायात् ॥

आपो॑ हि ष्ठा म॑यो भुवस्ता॑न ऊर्जे द॑धातन ।

महे रणा॑य चक्ष॑से ॥

योव॑श्शिवत॑मो रसस्तस्य॑ भाजयतेह न॑ः ।

उशतीरि॑व मातर॑ः ॥

तस्मा अर॑ङ्गमाम वो यस्य क्षया॑य जिन्व॑थ ।

आपो॑ जनय॑था च नः ॥

आपो॑ वा इदꣳ सर्वं॑ विश्वा॑ भूतान्याप॑ः प्राणा वा आप॑ः पशव

आपोऽन्नमापोऽमृ॑तमाप॑ स्सम्राडापो॑ विराडाप॑ स्स्वराडापश्छन्दाꣳस्यापो॑

ज्योतीꣳष्यापो यजूꣳष्याप स्सत्यमाप स्सर्वा देवता आपो भूर्भुवस्सुवराप ओम् ॥

द्रुपदादिवेन्मुमुचानः । स्विन्नस्स्नात्वी मलादिव । पूतं पवित्रेणेवाज्यम् । आपश्शुन्धन्तु मैनसः ॥

हिरण्यश्रृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः । यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः । यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम् । तन्न इन्द्रो वरुणो बृहस्पतिः सविता च पुनन्तु पुनः पुनः । नमोऽग्नयेऽप्सुमते नम इन्द्राय नमो वरुणाय नमो वारुण्यै नमोऽद्भ्यः । यदपाङ्क्रूरं यदमेध्यं यदशान्तन्तदपगच्छतात् । अत्याशनादतीपानाद्यच्च उग्रात्प्रतिग्रहात् । तन्नो वरुणो राजा पाणिना ह्यवमर्शतु । सोऽहमपापो विरजो निर्मुक्तो मुक्तकिल्बिषः । नाकस्य पृष्ठमारुह्य गच्छेद्ब्रह्मसलोकताम् । यश्चाप्सु वरुणस्स पुनात्वघमर्षणः । इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमꣳ सचता

परुष्णिया। असिक्निया मरुद्वृधे वितस्तयाऽऽर्जीकीये शृणुह्या सुषोमया।

ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत। ततोरात्रिरजायत ततस्समुद्रो अर्णवः। समुद्रादर्णवादधि संवत्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी। सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्। दिवञ्च पृथिवीञ्चान्तरिक्षमथो सुवः। यत्पृथिव्यां रजस्स्वमान्तरिक्षे विरोदसी। इमां स्तदापो वरुणः पुनात्वघमर्षणः। पुनन्तु वसवः पुनातु वरुणः पुनात्वघमर्षणः। एष भूतस्य मध्ये भुवनस्य गोप्ता। एष पुण्यकृताँल्लोकानेष मृत्योर्हिरण्मयम्। द्यावापृथिव्योर्हिरण्मयं संश्रितं सुवः। स नस्सुवस्संशिशाधि। आर्द्रञ्ज्वलति ज्योतिरहमस्मि। ज्योतिर्ज्वलतिब्रह्माहमस्मि। योऽहमस्मि ब्रह्माहमस्मि। अहमस्मि ब्रह्माहमस्मि। अहमेवाहं माञ्जुहोमि स्वाहा। अकार्यकार्यवकीर्णी स्तेनो भ्रूणहा गुरुतल्पगः। वरुणोऽपामघमर्षणस्तस्मात्पापात्प्रमुच्यते। रजो भूमिस्त्वमां रोदयस्व प्रवदन्ति धीराः। आक्रान्थ्समुद्रः प्रथमे

विधर्मञ्जनयन् प्रजा भुवनस्य राजा । वृषापवित्रे अधि सानो अव्ये
बृहत्सोमो वावृधे सुवान इन्दुः ॥

भूर्भुवस्सुवो भूर्भुवस्सुवो भूर्भुवस्सुवः ॥

(इति स्नात्वा, द्विराचम्य) देवर्षिपितृतर्पणं करिष्ये [1](देवतीर्थेन) ब्रह्मादयो ये देवाः तान् देवाँस्तर्पयामि । सर्वान् देवाँस्तर्पयामि । सर्वदेवगणाँस्तर्पयामि । सर्वदेवपत्नीस्तर्पयामि । सर्वदेवगणपत्नीस्तर्पयामि (अथ निवीतम्) ([2]ऋषितीर्थेन,) कृष्ण-द्वैपायनादयो ये ऋषयः तानृषीँस्तर्पयामि[2] । सर्वानृषीँस्तर्पयामि[2] सर्वर्षिगणाँस्तर्पयामि[2], सर्वर्षिपत्नीस्तर्पयामि[2], सर्वर्षिगणपत्नीस्तर्प-यामि[2], । (प्रजापतिं काण्डर्षिं त+मि[2], सोमं काण्डर्षिं त+मि[2] अग्निं काण्डर्षिं त+मि[2] विश्वान् देवान् काण्डर्षीँस्त+मि[2] सांहितीर्देवता उपनिषदस्त+मि[2] याज्ञिकीर्देवता उप+मि [2]वारुणी-र्देवता उप+मि[2] हव्यवाहं त+मि[2] विश्वान् देवान् काण्डर्षीँस्त+मि[2] ([3]ब्रह्मतीर्थेन) ब्रह्माणं स्वयम्भुवं त+मि[2] (ऋषितीर्थेन) विश्वान् देवान् काण्डर्षीँस्त+मि[2] अरुणान् काण्डर्षीँस्त+मि[2] (देवतीर्थेन,) सदसस्पतिं त+मि[2] ऋग्वेदं त+मि[1] यजुर्वेदं त+मि[1] सामवेदं त+मि[1] अथर्ववेदं त+मि[1] इतिहासपुराणं त+मि[1] कल्पं तर्पयामि[1]) (अथ

---

1 தேவதீர்த்தம் என்பது விரல்களின் நுனிபாகம். அதனல் தேவதர்ப்பணம்.

2 ருஷிதீர்த்தம் என்பது சுண்டுவிரலின் நடுபாகம். அதனல் ருஷிதர்பணம்.

3 ப்ரம்மதீர்த்தம் என்பது பெரியவிரலின் அடிபாகம், அதனல் ப்ரம்மதர்ப்பணம்

प्राचीनावीतम्) (1पितृतीर्थेन) सोमः पितृमान् यमोऽङ्गिरस्वान् अग्निः कव्यवाहन इत्यादयो ये पितरः तान् पितॅस्त+मि[3] सर्वान् पितॅस्त+मि[3] सर्वपितृगणाँस्त+मि[3] सर्वपितृपत्नीस्त+मि[3] सर्वपितृगण-पत्नीस्त+मि[3] (पितॄन् स्वधानमस्तर्पयामि[3] पितामहान् स्वधा नमस्त+मि[3] प्रपितामहान् स्वधा नमस्त+मि[3] मातामहान् स्वधानमस्त+मि[3] मातुःपितामहान् स्वधानमस्त+मि[3] मातुः प्रपितामहान् स्वधानमस्त+मि[3]) ॥

अथाचम्य अञ्जलिना जलमादाय तीरे यक्ष्माणं तर्पयेत् ।

यन्मया दूषितं तोयं शारीरमलसञ्चयात् ।
तद्दोषपरिहाराय यक्ष्माणं तर्पयाम्यहम् ॥ इति ॥

अथ तीरे कञ्चित्कालं प्राचीनावीती शिखोदकं पुरतः पातयेत्—

लतावृक्षेषु गुल्मेषु वर्तन्ते पितरो मम ।
तेषामाप्यायनार्थं तु इदमस्तु शिखोदकम् ॥ इति ॥

अथ निवीती, उत्तरीयवस्त्रं चतुर्गुणीकृत्य वस्त्रं निष्पीडयेत्—

ये केचास्मत्कुलेजाताः अपुत्रा गोत्रजा मृताः ।
ते गृह्णन्तु मयादत्तं वस्त्रनिष्पीडनोदकम् ॥

इति स्थले निष्पीड्य, वस्त्रं वामप्रकोष्ठे निक्षिप्य, द्विराचामेत् । ततः शुष्केणैकेन वस्त्रखण्डेन शिरः परिमृज्य, अन्येन वस्त्रखण्डेन अङ्गञ्च परिगृज्य, शुष्कं परिदध्यात् ॥

सङ्कल्पः सूक्तपठनं मार्जनञ्चाघमर्षणम् ।
देवादितर्पणं चेति स्नानं पञ्चाङ्गमीरितम् ॥

अथ पुण्ड्रं धृत्वा प्रातस्सन्ध्यामुपासीत ।

॥ इति प्रातस्स्नानविधिः ॥

---

1 பிதிருதீர்த்தம் என்பது பெரியவிரல்ஆள்காட்டிவிரல் களின் நடுபாகம். அதனல் பிதிருதர்ப்பணம்.

॥ यज्ञोपवीतधारणम् ॥

आचम्य—शुक्लाम्बर+शान्तये ओं भूः+सुवरोम् । ममोपात्त+प्रीत्यर्थं श्रौतस्मार्तविहितनित्यकर्मानुष्ठानयोग्यतासिद्धयर्थं ब्रह्मतेजोऽभिवृद्धयर्थं यज्ञोपवीतधारणं करिष्ये । अप उपस्पृश्य । अस्य श्रीयज्ञोपवीतधारणमहामन्त्रस्य परब्रह्म ऋषिः (शिरसि) त्रिष्टुप् छन्दः (मुखे) परमात्मा देवता (हृदये) यज्ञोपवीतधारणे विनियोगः । दक्षिणं बाहुमुद्धृत्य तदुपरि यथा ब्रह्मग्रन्थिर्भवति तथा यज्ञोपवीतं गृहीत्वा सव्यं बाहुमवधाय "यज्ञोपवीतं परमं पवित्रं प्रजापतेः यत्सहजं पुरस्तात् ।
आयुष्यं अग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवितं बलमस्तु तेजः ॥"

इति, गृहस्थः द्वे, (त्रीणि वा, उपवीतानि) प्रत्युपवीतं आचम्य मन्त्रं चोच्चार्य धारयेत् । अथाचम्य

उपवीतं भिन्नतन्तु जीर्णं कश्मलदूषितम् ।
विसृजामि (जले) न हि ब्रह्मवर्चो दीर्घायुरस्तु मे ॥

॥ इति जीर्णमुपवीतं विसृज्य आचामेत् ॥
॥ इति यज्ञोपवीतधारणम् ॥

॥ अग्निसन्धानम् ॥

प्रातः विधिवत् स्नात्वा सन्ध्यामुपास्य विच्छिन्नौपासनस्य पुनः करणार्थम् अग्निसन्धानं कुर्यात् । (अनुज्ञा) आचम्य—

"ऋध्या स्मे हव्यै नमसोपसद्य । मित्रं देवं मित्रधेयन्नो अस्तु ।
अनूराधान् हविषा वर्धयन्तः । शतञ्जीवेम शरदस्सवीराः" ॥

इति यजमानः स्वयं वदन् आचार्यानुगृहीतं पवित्रं धृत्वा, "ओम्

नमस्सदॅसे-नमस्सदॅसः - पतॅये-नमस्सखीॅनां-पुरोगाणां-चक्षुॅषे-नमो दिवे नमॅः पृथिव्यै" ॥

'सर्वेभ्यो ब्राह्मणेभ्यो नमः' । इति ब्राह्मणान् अक्षतैरभ्यर्च्य, नमस्कृत्य, दक्षिणाताम्बूलं गृहीत्वा, अशेषे हे परिषत् भवत्पादमूले मया समर्पितां इमां सौवर्णीं किञ्चिदपि दक्षिणां यथोक्तदक्षिणामिव स्वीकृत्य (ब्राह्मणेभ्यो दक्षिणां दत्त्वा, अनया मम धर्मपत्न्या सह, अनेककालविच्छिन्नौपासनस्य पुनःकरणार्थम् अग्निसन्धानं कर्तुं योग्यतासिद्धिरस्त्विति भवत्यनुगृहाण । इति प्रार्थयेत् । (योग्यतासिद्धिरस्तु इति परिषत्प्रतिवचनम्) सङ्कल्पः— दर्भेष्वासीनः, दर्भान् धारयमाणः, पत्न्या दर्भैरन्वारब्धः, शुक्लाम्बरधरं + सर्वविघ्नोप शान्तये ॥ ओम् भूः + सुवरोम् । ममोपात्त + प्रीत्यर्थम् शुभे दिने शोभने + शुभतिथौ अनया मम धर्मपत्न्या सह अग्निं सन्धास्ये अनेककालविच्छिन्नौपासनस्य पुनःकरणार्थम् , इति सङ्कल्प्य, पत्न्यर्थं पुनः प्राणानायम्य पत्नीं वाचयति—ममोपात्त + प्रीत्यर्थम् अग्निं सन्धास्ये अनेककालविछिन्नौपासनस्य पुनः करणार्थम् , इति, उत्तरतो दर्भान्निरस्य, अप उपस्पृश्य, पत्नीमपि अप उपस्पर्शयति ॥

शुचौ देशे चतुरश्रं स्थण्डिलं कल्पयित्वा तत्र शकलेन (दर्भैर्वा) दक्षिणत आरभ्य प्रागग्रास्तिस्रो लेखाः पश्चिमतः उदगग्राश्च तिस्रो लेखा उल्लिख्य शकलं स्थण्डिले निधाय सशेषं अद्भिरवोक्ष्य शकलं निर्ऋत्यां निरस्य, अप उपस्पृश्य, "भूर्भुवस्सुवरोम्" इत्यग्निं प्रतिष्ठाप्य, अग्न्याहरणपात्रम् अक्षतोदकैः अरिक्तं कृत्वा, अवोक्षण-

तोयशेषं प्रागुत्सिच्य प्राक्तोयम् अन्यत् निधाय अग्निमिध्वा प्रागग्रै-रुदग्रैश्च दर्भैरग्निं परिस्तृणाति (पुरस्तात् दक्षिणतः पश्चात् उत्तरतः) दक्षिणान् दर्भान् उत्तरान्, उत्तरानधरांश्च कृत्वा, अग्नेरुत्तरतः दर्भान् संस्तीर्य, तेषु द्वन्द्वंन्यञ्चि पात्राणि सादयति, दर्व्याज्यस्थाल्यौ प्रोक्षणींतरदर्व्यौ, चेति । (पवित्रयोस्संस्कारः आयामतः परीमाणम्) समौ साग्रौ दर्भौ तृणं काष्ठं वाऽन्तर्धाय, प्रादेशमात्रं छित्त्वा, अप उपस्पृश्य, अद्भिरनुमृज्य, पवित्रे कृत्वा, सपवित्रेण पाणिना पात्राणि संस्पृशति । (प्रोक्षणीसंस्कारः) अग्नेः पश्चात् उदग्राग्रान् दर्भान् संस्तीर्य, तेषु प्रोक्षणीपात्रं निधाय, अक्षतैः सह अप आसिच्य, उदग्राग्राभ्यां-पवित्राभ्यां प्राचीः त्रिरुत्पूय, पात्राण्युत्तानानि कृत्वा, सपवित्रेण उत्तानपाणिना पात्राणि सर्वाभिरद्भिः त्रिः प्रोक्ष्य, तदक्षिणतो निदधाति । (आज्यसंस्कारः) आज्यपात्रमादाय, अग्नेः पश्चान्निधाय, पवित्रान्त-र्हिते तस्मिन् आज्यं निरुप्य, उदीचोऽङ्गारान् परिस्तरणाद्बहिः उदीच्यां निरूह्य, तेष्वाज्यमधिश्रित्य, ज्वलता तृणेनावद्योत्य द्वे दर्भाग्रे प्रच्छिद्य, प्रक्षाल्य, आज्ये प्रत्यस्य, ज्वलता तृणेन त्रिः पर्यग्नि कृत्वा, आज्य-मुदगुद्वास्य, अङ्गारान् अग्नौ प्रत्यूह्य, आज्यपात्रं अग्नेः पश्चान्निधाय, उदग्राभ्यां पवित्राभ्यां [1]पुनराहारमाज्यं त्रिरुत्पूय, पवित्रे प्रागग्रमग्नौ प्रहरति । (दर्वीसंस्कारः) येन जुहोति तदग्नौ प्रतितप्य, दर्वीद्वयं दर्भैस्संमृज्य, पुनः प्रतितप्य, प्रोक्ष्य, निधाय, दर्भान् अद्भिस्संस्पर्श्य, अग्नौ प्रहरति । (अग्निपरिषेचनम्) "अदितेऽनुमन्यस्व" इति

---

1 புனராஹாரம் என்பது பவித்ரத்தை வடக்கு நுணியாகப் பிடித்துக் கொண்டு நெய்ப்பாத்திரத்தில் முதலில் கிழக்கில் வைத்து அங்கிருந்து அதிலேயே மறுபடியும் மேற்கே கொண்டு வந்து அதிலேயே மறுபடியும் கிழக்கே கொண்டுவிடுவது. இப்படி 3 தடவை செய்யவேண்டும்.

दक्षिणतः प्राचीनम् । अनुमतेऽनुमन्यस्व" इति पश्चादुदीचीनम् । "सरस्वतेऽनुमन्यस्व" इत्युत्तरतः प्राचीनम् । "देव सवितः प्रसुव" इति समन्तं प्रदक्षिणं परिषिञ्चति ॥

(अथ होमः)

अग्निसिद्ध्यर्थं व्याहृतिहोमं करिष्ये—चतुर्वारं इतरदर्व्या प्रधानदर्व्यामाज्यंगृहीत्वा, "ओम् भूर्भुवस्सुवस्स्वाहा" प्रजापतय इदं न मम । पूर्वेद्युः उपवासःथाने अयाश्चहोमं करिष्ये—पुनश्चतुर्वारमाज्यं पूर्ववत् गृहीत्वा "अयाश्चाग्नेऽसि-अनभिशस्तीश्च-सत्यमित्त्वं-अयाऽसि । अयासामनसा-धृतोऽयासा-हव्यमूहिषे अयानोधेहि-भेषजꣳस्वाहा" अग्नये अयस इदं न मम । अनेककालसायंप्रातराहुल्यकरणप्रायश्चित्तार्थं सर्वप्रायश्चित्तं होष्यामि—पुनश्चतुर्वारमाज्यं गृहीत्वा "ओम् भूर्भुवस्सुवस्स्वाहा" प्रजापतय इदं न मम । अनेककालदर्शपूर्णमासस्थालीपाकातिपत्तिप्रायश्चित्तार्थं सर्वप्रायश्चित्तं होष्यामि—पुनश्चतुर्वारमाज्यं गृहीत्वा "ओम् भूर्भुवस्सुवस्स्वाहा" प्रजापतय इदं न मम । अस्मिन् कर्मणि अविज्ञातप्रायश्चित्तानि करिष्ये—(इतःपरं प्रतिहोमम् एकवारमेवाज्यग्रहणम्) "अनाज्ञातं - यदाज्ञातं - यज्ञस्य - क्रियतेमिथु । अग्नेतदस्यकल्पय-

त्वꣳहि वेत्थ-यथातथꣳस्वाहा।" अग्नय इदं न मम । "पुरुषसंमितो यज्ञः-यज्ञः पुरुषसंमितः । अग्ने तदस्य कल्पय-त्वꣳहि वेत्थ-यथातथꣳस्वाहा।" अग्नय इदं न मम । "यत्पाकत्राः-मनसा-दीनदक्षा न । यज्ञस्य-मन्वते मर्तासः । अग्निष्टत्-होता-ऋतुवित्-विजानन्-यजिष्ठोदेवान्-ऋतुशो यजाति-स्वाहा।" अग्नय इदं न मम । "भूस्स्वाहा।" अग्नय इदं न मम । "भुवस्स्वाहा।" वायव इदं न मम । "सुवस्स्वाहा।" सूर्यायेदं न मम । "ओम् भूर्भुवस्सुव-स्वाहा।" प्रजापतय इदं न मम । अस्मिन् अग्निसन्धानकर्मणि सम्भावितमन्त्रतन्त्रस्वरवर्ण-विधिविपर्यासन्यूनातिरिक्तादिप्रायश्चित्तार्थं सर्वप्रायश्चित्तं होष्यामि— "ओम् भूर्भुवस्सुवस्स्वाहा।" प्रजापतय इदं न मम । "श्रीविष्णवे स्वाहा।" विष्णव इदं न मम । "नमो रुद्राय पशुपतये स्वाहा।" रुद्राय पशुपतय इदं न मम । (अप उपस्पृश्य) सप्त ते अग्ने-समिधः-सप्त जिह्वाः-सप्त ऋषयः-सप्त धाम प्रियाणि । सप्तहोत्राः-सप्तधा त्वा-यजन्ति-सप्तयोनीः-आपृणस्व-घृतेन स्वाहा अग्नये सप्तवत इदं न मम । आज्यपात्रमुत्तरतो निधाय, प्राणानायम्य, "अदितेऽन्वेमꣳस्थाः" दक्षिणतः प्राचीनम् । "अनुमतेऽन्वेमꣳस्थाः"

पश्चादुदीचीनम । "सर॑स्वतेऽन्व॑मꣳस्थाः" उत्तरतः प्राचीनम् । "देव॑ सवितः प्रास॑वीः" इति समन्तं प्रदक्षिणं परिषिञ्चति ॥

(अथ प्रकारान्तरेणायं होमः)

अत्र आदित एव प्रतिमन्त्रं सकृद्गृहीतेनाज्येन होमः। अनुज्ञा-प्रभृति "देव॑ सवितः प्रसु॑व" इति पूर्वपरिषेकान्तं कृत्वा (होमारम्भः) अग्निसिद्ध्यर्थं व्याहृतिहोमं करिष्ये—"ओम् भूर्भुव-स्सुवस्स्वाहा" प्रजापतय इदं न मम । पूर्वेद्युः उपवासस्थाने अयाश्चहोमं करिष्ये—"अयाश्चाग्नेऽसि - अनभिशस्तीश्च॑ - सत्य-मित्त्वं-अया ॲसि । अय॑सामन॑सा-धृतोऽयसा-हव्यमू॑हिषे- अयानो॑ धेहि-भेषजꣳस्वाहा" । अग्नये अयस इदं न मम । "पुन॑स्त्वादित्याः-रुद्रावस॑वः-समि॑न्धतां- पुन॑र्ब्रह्माण॑ः-वसुनीथयज्ञैः । घृतेनत्वं-तनुवो॑वर्धयस्व-सत्यास्स॑न्तु-यज॑मानस्य-कामास्स्वाहा" अग्नये वसुनीथायेदं न मम । "मनोज्योतिः - जुषतामाज्यं॑ - विच्छि॑न्नं यज्ञं- समिमंद॑धातु । या इष्टाः-उषस॑ः-निम्रु॑चश्च-तास्सन्द॑धामि-हविषा॑घृतेनस्वाहा" मनसे ज्योतिष इदं न मम । "यन्म॑

आत्मनः - मिन्दाऽभूत् - अग्निस्तत् - पुनराहाः - जातवेदाः-विचर्षणि-स्स्वाहा।" अग्नये जातवेदसे विचर्षणय इदं न मम । "पुनरग्निः-चक्षुरदात्-पुनरिन्द्रः-बृहस्पतिः । पुनर्मे-अश्विनायुवं-चक्षुराधत्तं-अक्ष्योस्स्वाहा।" अग्नीन्द्राबृहस्पत्यश्विभ्य इदं न मम । "तन्तुंन्तन्वन्-रजसः-भानुमन्विहि-ज्योतिष्मतः-पथोरक्ष - धियाकृतान् । अनुल्बणं - वयत - जोगुवामपः - मनुर्भव-जनयादैव्यं जन॑स्वाहा।" अग्नये तन्तुमत इदं न मम । "उद्बुध्यस्वाग्ने-प्रतिजागृह्येनं-इष्टापूर्ते-स॑सृजेथां-अयञ्च । पुनः कृण्व॑स्त्वा-पितरं युवानं-अन्वाता॑सीत्-त्वयि तन्तुं-एत॑स्वाहा।" अग्नये तन्तुमत इदं न मम । "त्रयस्त्रिं॑शत्-तन्तवः-ये वितत्निरे-य इमं यज्ञं स्वधयाददन्ते - तेषांछिन्नं प्रत्येतत् - दधामिस्वाहा - घर्मो देवान्-अप्येतुस्वाहा।" अग्नये तन्तुमत इदं न मम । "भूः-स्स्वाहा।" अग्नय इदं न मम । "भुवस्स्वाहा।" वायव इदं न मम । "सुवस्स्वाहा।" सूर्यायेदं न मम । "ओम् भूर्भुवस्सुवस्स्वाहा।" प्रजापतय इदं न मम । अनेककाल

सायंप्रातराहुत्यकरणप्रायश्चित्तार्थं सर्वप्रायश्चित्तं होष्यामि- "ओम् भूर्भुवस्सुवस्स्वाहा" प्रजापतय इदं न मम । अनेककालदर्शपूर्णमासस्थालीपाकातिपत्तिप्रायश्चित्तार्थं सर्वप्रायश्चित्तं होष्यामि— "ओम् भूर्भुवस्सुवस्स्वाहा—प्रजापतय इदं न मम । अस्मिन् कर्मणि अविज्ञातप्रायश्चित्तानि करिष्ये— "अनाज्ञातं + यथातथꣳस्वाहा" अग्नय इदं न मम । "पुरुषसम्मितो यज्ञः + तथꣳस्वाहा" अग्नय इदं न मम । "यत्पाकत्राः + यजाति-स्वाहा" अग्नय इदं न मम । "त्वन्नो अग्ने-वरुणस्य विद्वान्-देवस्य हेडः-अवयासिसीष्ठाः । यजिष्ठः-वह्नितमः-शोशुचानः-विश्वाद्वेषाꣳसि-प्रमुमुग्धि-अस्मत्स्वाहा" अग्नीवरुणाभ्यामिद न मम । स त्वन्नो अग्ने-अवमः - भवोती - नेदिष्ठो अस्याः - उषसो व्युष्टौ । अवयक्ष्वनः-वरुणं ररांणः-वीहिमृडीकं-सुहवोनः-एधि स्वाहा" अग्नीवरुणाभ्यामिदं न मम । "यते इन्द्र-भयामहे-ततो नः-अभयं कृधि । मघवन्-शग्धि-तव तन्नः-ऊतये-विद्विषः-विमृधोजहि-स्वाहा" इन्द्राय मघवत इदं न मम । स्वस्तिदाः-विशस्पतिः-वृत्रहा-विमृधोवशी । वृषेन्द्रः-पुरएतुनः-स्वस्तिदाः-

अभयङ्करस्स्वाहा।" इन्द्राय अभयङ्करायेदं न मम। "आभिर्गीर्भिः-यदतो नः-ऊनमाप्यायय-हरिवः-वर्धमानः। यदा-स्तोतृभ्यः-महिगोत्रा-रुजासि-भूयिष्ठभाजः-अधते स्याम-स्वाहा।" इन्द्राय हरिवते वर्धमानायेदं न मम। "त्र्यम्बकं-यजामहे-सुगन्धि-पुष्टिवर्धनम्। उर्वारुकमिव-बन्धनात्-मृत्योर्मुक्षीय-माऽमृतात्-स्वाहा।" त्र्यम्बकायेदं न मम। "इदं विष्णुः-विचक्रमे-त्रेधा-निदधे पदम्। समूढमस्य-पाᳬसुरे स्वाहा।" विष्णव इदं न मम। "भूस्स्वाहा।" इत्यारभ्य "देवसवितः प्रासावीः" इत्युत्तरपरिषेकान्तं पूर्ववत् कर्तव्यम्॥

॥ इति प्रकारान्तरेणाग्निसन्धानहोमः॥

शुक्लाम्बर+शान्तये। ओम् भूः+सुवरोम्। ममोपात्त+प्रीत्यर्थं अनेककालसायम्प्रातराहुत्यकरणप्रायश्चित्तार्थं अनेककालदर्शपूर्णमास-स्थालीपाकातिपत्तिप्रायश्चित्तार्थं यत्किञ्चिदौपासनहोमद्रव्यदानं प्राजापत्य-कृच्छ्रप्रत्याम्नायतया यत्किञ्चिद्धिरण्यदानञ्चकरिष्ये (इति सङ्कल्प्य सतण्डुलं हिरण्यं गृहीत्वा)

हिरण्यगर्भगर्भस्थं हेम बीजं विभावसोः।
अनन्तपुण्यफलदं अतश्शान्तिं प्रयच्छ मे॥
तण्डुला वैश्वदेवत्याः पाकेनान्नं प्रचक्षते।
यतस्तण्डुलदानेन अतश्शान्तिं प्रयच्छ मे॥

अनेककालसायंप्रातराहुत्यकरणप्रायश्चित्तीयं अनेककालदर्श-पूर्णमासस्थालीपाकातिपत्तिप्रायश्चित्तीयं च इदमौपासनहोमद्रव्यं ,प्राजापत्यकृच्छ्रप्रत्यान्नयभूतं यत्किञ्चिद्धिरण्यञ्च यज्ञेश्वरस्वरूपाय ब्राह्मणाय सम्प्रददे न मम, इति ब्राह्मणाय तण्डुलादिकं दद्यात् ॥

॥ इत्यग्निसन्धानम् ॥

॥ अथ औपासनम् ॥

शुक्लाम्बरधरं+शान्तये । ओम् भूः+सुवरोम् । ममोपात्त+प्रीत्यर्थं पूर्वेद्युः सायमौपासनेन सह अद्य प्रातरौपासनं तण्डुलैर्होष्यामि, इति सङ्कल्प्य, अप उपस्पृश्य

"चत्वारि शृङ्गा-त्रयो अस्य-पादा:-द्वेशीर्षे-सप्तहस्तासः-अस्य ।
त्रिधा बद्धः-वृषभः-रोरवीति-महो देवः-मर्त्यान्-आविवेश ॥
एष हि देवः-प्रदिशः-अनुसर्वाः-
पूर्वो हि जातः-सउगर्भे-अन्तः ।
सविजायमानः-स जनिष्यमाणः-
प्रत्यङ्मुखाः-तिष्ठति-विश्वतो मुखः"

सर्वतोमुख हे अग्ने ममाभिमुखो भव, इत्यग्निं ध्यात्वा अग्निमभितः अक्षतैः, प्रागारभ्याष्टसु दिक्षु, अग्नये नमः, जातवेदसे

नमः, सहौजसे नमः, अजिराप्रभवे नमः, वैश्वानराय नमः, नर्यापसे नमः, पंक्तिराधसे नमः, विसर्पिणे नमः, इत्यग्नेरष्टपुरुषान्, अग्नौ—यज्ञपुरुषाय नमः, आत्मनि-आत्मने नमः, ब्राह्मणेषु सर्वेभ्यो ब्राह्मणेभ्यो नमः, इति यज्ञपुरुषादींश्च अभ्यर्च्य "अदि॒ तेऽनु॑मन्यस्व" "अनु॑मतेऽनु॑मन्यस्व" "सर॑स्वतेऽनु॑मन्यस्व" "दे॑व सवित॒ः प्रसु॑व" इति परिषिच्य, "होष्यामि" इति ब्राह्मणाननुज्ञाप्य "जुहुधि" इति तैः प्रत्युक्ते, तूष्णीमेकां समिधमग्नावाधाय, औपासनहोमद्रव्यं दक्षिणहस्ते किञ्चित्, वामहस्ते तदधिकं च गृहीत्वा, प्रथमं दक्षिणहस्तस्थितेन द्रव्येण अग्नेर्मध्ये "अग्नये स्वाहा" अग्नय इदं न मम। ततो वामहस्तस्थितं द्रव्यं दक्षिणहस्ते गृहीत्वा तेन अग्नेरुत्तरार्धपूर्वार्धे "अग्नये स्विष्टकृते स्वाहा" अग्नयेस्विष्टकृत इदं मम। पुनः पूर्ववत् औपासनहोमद्रव्यं द्विधा विभज्य तेन क्रमशः पूर्ववत् "सूर्या॑य स्वाहा" सूर्यायेदं न मम। "अग्नये स्विष्टकृते स्वाहा" अग्नये स्विष्टकृत इदं न मम "अदिते+स्थाः अनु॑मते+स्थाः, सर॑स्वते+स्थाः, "दे॑वसवितः प्रासा॑वीः" इति पूर्ववत् परिषिच्य, सायंप्रातरौपासनहोमसाद्गुण्यार्थं अनाज्ञातादि-मन्त्रजपङ्करिष्ये—"अनाज्ञातं+यथातथम्" ॥ "पुरु॑षसंमितो यज्ञः+ यथातथम्" ॥ "यत्पा॑कत्राः+य॑जाति" ॥ "इदं विष्णु॑ः+पांसुरे"

इति जपित्वा "स्वाहा" इति समिधमग्नावाधाय अग्नेरुपस्थानङ्करिष्ये—

"अग्ने नय-सुपथा राये-अस्मान्-विश्वानि देव-वयुनानि विद्वान् ।
युयोध्यस्मत्-जुहुराणमेनः-भूयिष्ठान्ते नमउक्तिं विधेम ॥"

अग्नये नमः ।
मन्त्रहीनं क्रियाहीनं भक्तिहीनं हुताशन ।
यद्भुतन्तु मया देव परिपूर्णं तदस्तुते ॥
प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥
नमस्ते गार्हपत्याय नमस्ते दक्षिणाग्नये ।
नम आहवनीयाय महावेद्यै नमो नमः ॥
काण्डद्वयोपपाद्याय कर्मब्रह्मस्वरूपिणे ।
स्वर्गापवर्गरूपाय यज्ञेशाय नमो नमः ॥
यज्ञेशाच्युत गोविन्द माधवानन्त केशव ।
कृष्ण विष्णो हृषीकेश वासुदेव नमोऽस्तु ते ॥

इति नमस्कृत्य, अभिवाद्य, अग्नेर्भस्म गृहीत्वा

"बृहत्साम-क्षत्रभृत्-वृद्धवृष्णियं-त्रिष्टुभौजः-शुभितं-उग्रवीरम् ।
इन्द्रस्तोमेन-पञ्चदशेन-मध्यमिदं-वातेन-सगरेण रक्ष ॥"

इति रक्षां धृत्वा, कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्याऽऽत्मना वा प्रकृतेस्स्वभावात् । करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥ इति भूमौ साक्षतं जलं निनीय—पवित्रं विसृज्याचम्य, अग्निं सुरक्षितं कुर्यात् ॥

"ओम् । भूर्भुवस्सुवः । तत्सवितुर्वरेण्यंभर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात्" । देव सवितः प्रसुव । सत्यं त्वर्तेन परिषिञ्चामि । अमृतोपस्तरणमसि । प्राणाय स्वाहा, अपानाय स्वाहा, व्यानाय स्वाहा, उदानाय स्वाहा, समानाय स्वाहा, ब्रह्मणे स्वाहा, महागणपतये नमः नालिकेरखण्डद्वयं (कदलीफलादिकं वा) निवेदयामि, निवेदनानन्तरं आचमनीयं स+मि, अमृतापिधानमसि । पूगीफलसमायुक्तं नागवल्लीदलैर्युतम् । कर्पूरचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ ताम्बूलं निवेदयामि । कर्पूरनीराजनं सन्दर्शयामि- "न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" ॥

नीराजनानन्तरं आचमनीयं समर्पयामि मन्त्रपुष्पं स+मि, स्वर्णपुष्पं समर्पयामि, समस्तोपचारान् समर्पयामि,

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

इति सम्प्रार्थ्य, करिष्यमाणतत्तत्कर्मानुगुणं सङ्कल्प्य "गणानांत्वा+सादेनम्" अस्मात् हरिद्राबिम्बात् आवाहितं महागणपतिं यथास्थानं प्रतिष्ठापयामि, शोभनार्थे क्षेमाय पुनरागमनाय च, इति विघ्नेश्वरमुद्वास्य, तत्प्रसादं शिरसि धारयेत् ॥

॥ ग्रहप्रीतिः ॥

पवित्रपाणिः—शुक्लाम्बर×शान्तये ॥

ओम् भूः ×सुवरोम्। मम×प्रीत्यर्थम् अद्य सङ्कल्पित.....कर्मारम्भमुहूर्तस्य सुमुहूर्ततासिद्धयर्थं तल्लग्नापेक्षया (मयिविषये) आदित्यादीनां नवानां ग्रहाणां आनुकूल्यसिद्धयर्थं आदित्यादि नवग्रहप्रसादसिद्धयर्थं यत्किञ्चित् हिरण्यदानङ्करिष्ये। अप उपस्पृश्य। (साक्षतं हिरण्यं गृहीत्वा) तीर्थंनिनीय, "हिरण्यगर्भगर्भस्थं हेम बीजंविभावसोः। अनन्तपुण्यफलदं अतश्शान्तिं प्रयच्छ मे॥" सङ्कल्पित..कर्मारम्भमुहूर्तस्य सुमुहूर्ततासिद्धयर्थं आदित्यादिनवग्रह-देवताप्रसादसिद्धयर्थं इदमाग्नेयं हिरण्यं नानागोत्रेभ्यो ब्राह्मणेभ्यः तेभ्यस्तेभ्यः संप्रददे, न मम। इति भूमौ निनीय, हिरण्यं ब्राह्मणेभ्यो दत्त्वा आदित्यादयः प्रीयन्ताम् इति प्रार्थयेत ॥

॥ अभ्युदयः ॥

पवित्रपाणिः—शुक्लाम्बरधरं×शान्तये। ओम् भूः×सुवरोम्। मम×प्रीत्यर्थं अद्य सङ्कल्पित..कर्माङ्गतया अभ्युदयं हिरण्यरूपेण करिष्ये। अप उपस्पृश्य।(साक्षतं हिरण्यं गृहीत्वा। तीर्थं निनीय 'हिरण्य-गर्भगर्भस्थं हेम बीजं विभावसोः। अनन्तपुण्यफलदं अतश्शान्तिं प्रयच्छ मे॥" अद्य सङ्कल्पित..कर्माङ्गभूतेऽस्मिन्नभ्युदये सत्यवसुसंज्ञक विश्वेदेव - अभ्युदयसंरक्षकविष्णुसहित - नान्दीशोभनदेवतापीत्यर्थं इदमाग्नेयं हिरण्यं सत्यवसुसंज्ञकविश्वेदेव - अभ्युदयसंरक्षक - विष्णुसहितनान्दीशोभनदेवतास्वरूपेभ्यः ब्राह्मणेभ्यः संप्रददे, न मम इति भूमौ निनीय, नान्दीशोभनदेवताः पितरः प्रीयन्ताम्, इति हिरण्यं ब्राह्मणेभ्यो दत्त्वा,—स्वामिनः मया हिरण्येन कृतमभ्युदयकर्म सम्पन्नम्? इतिप्रार्थयेत्। 'सुसम्पन्नम्' इति ब्राह्मणप्रतिवचनम्॥

"इडॉ देवहूः, मनुर्यज्ञनीः, बृहस्पतिः, उक्थामदानि, शꣳसिषत्, विश्वे देवाः, सूक्तवाचः, पृथिविमातः, मा मा हिꣳसीः, मधु मनिष्ये, मधु जनिष्ये, मधुवक्ष्यामि, मधु वदिष्यामि, मधुमतीं देवेभ्यः, वाचमुद्यासं, शुश्रूषेण्यां, मनुष्येभ्यः, तं मा देवाः, अवन्तु, शोभायै पितरः, अनुमदन्तु" ॥ इड एहि ॥ "अदितिर्नः, उरुष्यतु, अदितिः-शर्म यच्छतु । अदितिः, पात्वꣳहसः" ॥ अदित एहि ॥ "प्रणो देवी, सरस्वती, वाजेभिः, वाजिनीवती । धीनां, अवित्री, अवतु" ॥ सरस्वत्येहि ॥ शोभनं शोभनम् । मनस्समाधीयताम् ("समाहितमनसः स्मः" इति ब्राह्मणप्रतिवचनम्) प्रसीदन्तु भवन्तः, ("प्रसन्नाः स्मः" इति ब्राह्मणप्रतिवचनम्) श्रीरस्त्विति भवन्तो ब्रुवन्तु ("अस्तु श्रीः" इति+प्रतिवचनम्) पुण्याहं भवन्तो ब्रुवन्तु । ("ओम् पुण्याहम्" इति+प्रतिवचनम्) अथ अभ्युदयकर्माङ्गं पुण्याहं वाचयित्वा, ब्राह्मणेभ्यः आशिषो गृह्णीयात् ॥

॥ पुण्याहवाचनम् ॥

शुचौ देशे चतुरश्रं स्थण्डिलमुपकल्प्य, तस्मिन् व्रीहीन् तदुपरि तण्डुलांश्च निक्षिप्य, तन्मध्ये अष्टदलं पद्मं विलिख्य, तत्र प्रागग्रान् दर्भान् संस्तीर्य, तेषु कुम्भं निधाय, व्याहृतीभिः शुद्ध-जलेनापूर्य, पञ्चत्वक्पञ्चपल्लवरत्नकूर्चनालिकेरादिभिरलङ्कृत्य

आचम्य, पवित्रं धृत्वा, प्राङ्मुखः दर्भेष्वासीनः, दर्भान् धारयमाणः सङ्कल्पङ्करोति,—शुक्लाम्बर+शान्तये। ओमभूः+सुवरोम् । ममोपात्त+प्रीत्यर्थं शुभे दिने शोभने+शुभतिथौ आत्मशुद्धयर्थं गृहमण्डपादिसर्वोपकरणशुद्धयर्थं पुण्याहवाचनङ्करिष्ये—(सङ्कल्पिततत्तत्कर्माङ्गतया पुण्याह वाचने, सङ्कल्पितकर्मनाम..निर्दिश्य तदङ्गं पुण्याहवाचनङ्करिष्ये) इति सङ्कल्प्य, अप उपस्पृश्य, पुण्याहे यथासम्भवं ब्राह्मणान् भोजयिष्ये इति साहिरण्यं अक्षतोदकं भूमौ निनीय, हिरण्यं ब्राह्मणेभ्यो दद्यात् । अथ पुण्याहवाचनकर्मणि ऋत्विजो वो वृणे इति ब्राह्मणान् वृत्वा दक्षिणोत्तराभ्यां पाणिभ्यां कुम्भं धृत्वा (दर्भमुष्टिना वा-स्पृष्ट्वा) ब्राह्मणान् पृच्छति—ओम् भवद्भिरनुज्ञातः पुण्याहं वाचयिष्ये ('ओम् वाच्यताम्' इति+प्रतिवचनम्) ओम् कर्मणः पुण्याहं भवन्तो ब्रुवन्तु, ('ओम् पुण्याहं कर्मणोऽस्तु' इति+प्रतिवचनम्) ओम् कर्मणे स्वस्ति भवन्तो ब्रुवन्तु, ('ओम् कर्मणे स्वस्ति' इति+प्रतिवचनम्) ओम् कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु ('ओम् कर्म ऋध्यताम्' इति+प्रतिवचनम्) ततो दर्भेषु कुम्भं निधाय, (दर्भमुष्टिं निधाय) कुम्भस्योत्तरतः अन्यस्मिन् पात्रे कूर्चेन कुम्भात् उदकं प्रतिवचनमासिञ्चति—ऋद्धिः समृद्धिरस्तु, पुण्याहसमृद्धिरस्तु, शुभङ्कर्मास्तु, प्रजापतिः प्रीयताम् (सङ्कल्पितकर्माङ्गतया पुण्याहे तत्कर्मनिर्दिष्टाः देवताः प्रीयन्ताम् इति) शान्तिरस्तु, तुष्टिरस्तु, पुष्टिरस्तु, ऋद्धिरस्तु, निर्विघ्नमस्तु, आयुष्यमस्तु, आरोग्यमस्तु, धन धान्यसमृद्धिरस्तु, गोब्राह्मणेभ्यः शुभं भवतु, (ऐशान्यां) बहिर्देशे अरिष्टनिरसनमस्तु, (आग्नेय्यां) यत् पापं तत् प्रतिहतमस्तु, सर्वशोभ नमस्तु, सर्वाः सम्पदः सन्तु, पात्रोत्सिक्तं जलं पुनः कुम्भे निनीय, वरुणपूजाङ्कुर्यात् ॥

"ओम्, इमं मे वरुण, श्रुधी हवं, अद्या च मृडय । त्वामवस्युः, आचके ॥ तत्वो यामि, ब्रह्मणावन्दमानः, तदाशास्ते, यजमानो हविर्भिः । अहेडमानः, वरुणेह बोधि, उरुशꣳस, मा नः, आयुः, प्रमोषीः ॥

अस्मिन् कुम्भे सकलतीर्थाधिपतिं वरुणं ध्यायामि, आवाहयामि, वरुणाय नमः आसनं स+मि, पाद्यं स+मि, अर्घ्यं स+मि, आचमनीयं स+मि, "भूर्भुवस्सुवः" स्नपयामि, स्नानानन्तरमाचमनीयं स+मि, वस्त्रार्थं अक्षतान् स+मि, उपवीतार्थं अक्षतान् स+मि, आभरणार्थं अक्षतान् स+मि, गन्धान् धारयामि, कुङ्कुमं स+मि, अक्षतान् समर्पयामि, पुष्पैः पूजयामि, ओम् वरुणाय नमः, प्रचेतसे नमः, सुरूपिणे नमः, अपां पतये नमः, मकरवाहनायनमः, माणिक्यभूषणाय नमः, यादसां पतये नमः पाशहस्ताय नमः, वरुणाय नमः, नानाविधपरिमलपत्रपुष्पाणि स+मि, धूपार्थं अक्षतान् स+मि दीपार्थं अक्षतान् स+मि (अथनैवेद्यम्)

"ओम् भूर्भुवस्सुवः तत्सवितुः+प्रचोदयात् । देव सवितः+ परिषिञ्चामि" । "अमृतोपस्तरणमसि, प्राणाय स्वाहा+ब्रह्मणे स्वाहा" वरुणाय नमः नालिकेरखण्डद्वयं (कदलीफलादिकं वा) निवेदयामि, निवेदनानन्तरं आचमनीयं स+मि, "अमृतापिधानमसि" । पूगीफल+

प्रतिगृह्यताम् ॥ ताम्बूलं निवेदयामि, कर्पूरनीराजनं सन्दर्शयामि, (न) तत्र+सर्वमिदं विभाति) नीराजनानन्तरं आचमनीयं स+मि, मन्त्रपुष्पं स+मि, सुवर्णपुष्पं स+मि, सर्वोपचारैः पूजयामि, पुण्याहवाचन-जपकर्मणि, सर्वेभ्यो ब्राह्मणेभ्यो नमः, इति ब्राह्मणानभ्यर्च्य, कुम्भं स्पृष्ट्वा ब्राह्मणैस्सह जपति। जपमन्त्राः,-"दधिक्राव्ण्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखाकरत्प्रण आयूꣳषि तारिषत् ॥ आपो हि ष्ठा मयो भुवस्तान ऊर्जे दधातन। महे रणाय चक्षसे ॥ यो वश्शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः ॥ तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः" ॥

हिरण्यवर्णाश्शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः। अग्निं या गर्भन्दधिरे विरूपास्ता न आपश्शꣳस्योना भवन्तु ॥ यासाꣳराजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम्। मधुश्चुतश्शुचयो याः पावकास्ता न आपश्शꣳस्योना भवन्तु ॥ यासान्देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति। याः पृथिवीं पयसोन्दन्ति

शुक्रास्ता न आपश्शꣳस्योना भवन्तु ॥ शिवेन मा चक्षुषा पश्यताप-
श्शिवया तनुवोपस्पृशत त्वचं मे । सर्वाꣳअग्नीꣳरफ्सुषदो हुवे वो मयि
वर्चो बलमोजो निधत्त ॥

यद्दस्संप्रयती रहावनदताहते । तस्मादानद्यो नामस्थतावो
नामानि सिन्धवः । यत्प्रेषिता वरुणेन ताश्शीभꣳसमवल्गत । तदा-
प्नोदिन्द्रो वो यतीस्तस्मादापो अनुस्थन । अपकामꣳस्यन्दमाना अवी-
वरत वोहिकम् । इन्द्रो वश्शक्तिभिर्देवीस्तस्माद्वार्णाम वो हितम् ।
एको देवो अप्यतिष्ठत्स्यन्दमाना यथावशम् । उदानिषुर्महीरिति तस्मा-
दुदकमुच्यते । आपो भद्रा घृतमिदाप आसुग्नीषोमौ बिभ्रत्याप इत्ताः ।
तीव्रो रसो मधुपृचामरङ्गम आ मा प्राणेन सह वर्चस गन् । आदित्पश्याम्युत
वा शृणोम्यामावोषो गच्छति वाङ्न आसाम् । मन्ये भेजानो अमृतस्य
तर्हि हिरण्यवर्णा अतृप्यदावः । आपो हि ष्ठा मयो भुवस्तान ऊर्जे+
च नः । दिवि श्रयस्वान्तरिक्षे यतस्व पृथिव्या सम्भव ब्रह्मवर्चसमसि
ब्रह्मवर्चसाय त्वा ॥

पवमानस्सुवर्जनः । पवित्रेण विचर्षणिः । यः पोता स पुनातु मा । पुनन्तु मा देवजनाः । पुनन्तु मनवो धिया । पुनन्तुविश्वे आयवः । जातवेदः पवित्रवत् । पवित्रेण पुनाहि मा । शुक्रेण देव दीद्यत् । अग्ने क्रत्वा क्रतूꣳरनु । यत्ते पवित्रं मर्चिषि । अग्ने विततमन्तरा । ब्रह्मतेन पुनीमहे । उभाभ्यांदेवसवितः । पवित्रेण सवेन च । इदं ब्रह्म पुनीमहे । वैश्वदेवी पुनती देव्यागात् । यस्यै बह्वीस्तनुवो वीतपृष्ठाः । तयामदन्तस्सधमाद्येषु । वयꣳस्याम पतयो रयीणाम् । वैश्वानरो रश्मिभिर्मापुनातु । वातः प्राणेनेषिरो मयोभूः । द्यावापृथिवी पयसा पयोभिः । ऋतावरी यज्ञिये मापुनीताम् । बृहद्भिस्सवितस्तृभिः । वर्षिष्ठैर्देवमन्मभिः । अग्नेदक्षैः पुनाहिमा । येन देवा अपुनत । येनापो दिव्यङ्कशः । तेनदिव्येन ब्रह्मणा । इदं ब्रह्म पुनीमहे । यः पावमानीरध्येति । ऋषिभिस्संभृतꣳरसम् । सर्वꣳसपूतमश्नाति । स्वदितंमातरिश्वना । पावमानीर्यो अध्येति । ऋषिभिस्संभृतꣳरसम् । तस्मैसरस्वतीदुहे । क्षीरꣳसर्पिर्मधूदकम् ।

पावमानीस्स्वस्त्ययनीः । सुदुघाहिपयस्वतीः । ऋषिभिस्संभृतोरसः ।
ब्राह्मणेष्वमृत ँहितम् । पावमानीर्दिशन्तुनः । इमँल्लोकमथोअमुम् ।
कामान्थ्समर्धयन्तुनः । देवीर्देवैस्समाभृताः । पावमानीस्स्वस्त्ययनीः ।
सुदुघाहिघृतश्चुतः । श्रषिभिस्संभृतोरसः । ब्राह्मणेष्वमृत ँहितम् ।
येनदेवाः पवित्रेण । आत्मानंपुनतेसदा । तेनसहस्रधारेण । पावमान्यः पुनन्तुमा । प्राजापत्यंपवित्रम् । शतोद्याम ँहिरण्मयम् । तेन ब्रह्मविदोवयम् । पूतंब्रह्मपुनीमहे । इन्द्रस्सुनीतीसहमापुनातु । सोमस्स्वस्त्यावरुण स्समीच्या । यमोराजाप्रमृणाभिः पुनातु मा । जातवेदामोर्जयन्त्या पुनातु ॥

भूर्भुवस्सुवः । तच्छय्योरावृणीमहे । गातुय्यज्ञाय । गातुय्यज्ञपतये । दैवीस्स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वञ्जिगातु भेषजम् । शन्नो अस्तु द्विपदे । शञ्चतुष्पदे ॥

॥ ओम् शान्ति श्शान्ति श्शान्तिः ॥

पुनः पूजा—वरुणाय नमः आसनादिसमस्तोपचारैः पूजयामि-(पुष्पाक्षतैः) तत्त्वॉयामि+मान आयुः प्रमोषीः। अस्मात् कुम्भात् आवाहितं वरुणं यथास्थानं प्रतिष्ठापयामि। शोभनार्थे क्षेमाय प्रनरागमनाय च, इति वरुणमुद्वास्य, द्रुपदादिवेन्मुँमुचानः। स्विन्नस्स्नात्वीमलादिव। पूतं पवित्रेणेवाज्यम्। आपश्शुधन्तु मैनसः। भूर्भुवस्सुवो भूर्भुवस्सुवो भुर्भूवस्सुवः" इत्यात्मानं पत्नीञ्चप्रोक्षति। ऋत्विजः देवस्यत्वेत्यादिभिः प्रोक्षन्ति—देवस्य त्वा सवितुः प्रसवे। अश्विनोर्बाहुभ्याम्। पूष्णोहस्ताभ्याम्। अश्विनोर्भैषज्येन। तेजसे ब्रह्मवर्चसायाभिषिञ्चामि। देवस्यत्वासवितुः प्रसवे। अश्विनोर्बाहुभ्याम्। पूष्णोहस्ताभ्याम्। सरस्वत्यै भैषज्येन। वीर्यायान्नद्यायाभिषिञ्चामि। देवस्यत्वासवितुः प्रसवे। अश्विनोर्बाहुभ्याम्। पूष्णो हस्ताभ्याम्। इन्द्रस्येन्द्रियेण। श्रियैयशसेबलायाभिषिञ्चामि॥ देवस्यत्वासवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्यां सरस्वत्यै वाचोयन्तुर्यन्त्रेणाग्नेस्त्वा साम्राज्येनाभिषिञ्चामीन्द्रस्यत्वा साम्राज्येनाभिषिञ्चामि बृहस्पतेस्त्वा साम्राज्येनाभिषिञ्चामि॥ इति॥

"भूर्भुवस्सुवः" इति व्याहृतीभिरेव गृहमण्डपादीनि सर्वोपकरणानि च प्रोक्षेत् । यजमानः-पवित्रंकर्णेनिधाय "आपइद्वा उभेषजीः, आपो अमीवचातनीः । आपस्सर्वस्य भेषजीः, तामे कृण्वन्तु भेषजम् ॥ अकालमृत्युहरणं सर्वव्याधिनिवारणम् । सर्वपापक्षयकरं मन्त्र पूतोदकं शुभम् ॥ इति पुण्याहतीर्थं निषेव्य पत्नीं च निषेवयित्वा (अकालमृत्युहरणं+मन्त्रपूतोदकं शुभम्) पुनः पवित्रंधृत्वा, "अनया दक्षिणया वरुणः प्रीयताम्" इति पुण्याहवाचनजपकर्तृभ्यो ब्राह्मणेभ्यः दक्षिणां दत्वा पवित्रं विसृज्य आचम्य तानृत्विजो भोजयित्वाऽऽशिषो वाचयेत् ॥

॥ पञ्चगव्य सम्मेळनम् ॥

आचम्य पवित्रं धृत्वा दर्भेष्वासीनः+श्रीपरमेश्वर प्रीत्यर्थं आत्मशुद्ध्यर्थं त्वगस्थिदोषनिवृत्त्यर्थं पञ्चगव्यसम्मेळनङ्करिष्ये-इति सङ्कल्प्य स्थण्डिलोपरि तण्डुलराशौ षट्सु पात्रेषु षड्द्रव्याणि तत्तन्मन्त्रेणाभिमृशेत् । तत्र प्रथमं मध्यपात्रे गोमूत्रं गायत्र्याऽभिमृश्य

अथ, गन्धद्वारा न्दुराधरषा न्नित्यपुष्टाङ्करीषिणीम् । ईश्वरीꣳ सर्वभूताना न्तामिहोपह्वयेश्रियम्" ॥ इति मन्त्रेण पूर्वपात्रे गोमयमभिमृशेत् । अथ "आप्यायस्व समेतुते विश्वतस्सोम वृष्णियम् । भवा वाजस्य सङ्गथे" ॥ इति मन्त्रेण दक्षिणपात्रे क्षीरमभिमृशेत् ।

अथ "दधिक्राव्ण्णो अकारिष जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखाकरत्प्रण आयूँषि तारिषत्" ॥ इति मन्त्रेण पश्चिमपात्रे दधि अभिमृशेत्। अथ "शुक्रमसि ज्योतिरसि तेजोऽसि" इति मन्त्रेण उत्तरपात्रे घृतमभिमृशेत्। अथ, "देवस्यत्वा सवितुः प्रसवेऽश्विनो र्बाहुभ्यां पूष्णो हस्ताभ्या माददे । इति मन्त्रेण ईशानपात्रे कुशोदकमभिमृशेत्। पुनः मध्यपात्रं स्पृशन् "ओम् भूर्भुवस्सुवः। तत्सवितुः+ प्रचोदयात्" इति गायत्रीं सकृदुच्चार्य, पुनः "गन्धद्वारां+श्रियम् । इति+गोमयं मध्यपात्र एव निक्षिप्य, पुनः "आप्यायस्व+सङ्गथे ॥ इति क्षीरमपि मध्यपात्र एव संमिश्रय, पुनः "दधिक्राव्ण्णः+ तारिषत्। इति दधिच तत्रैव संमिश्रय पुनः "शुक्रमसि+तेजोऽसि, इति घृतञ्च तत्रैव संमिश्रय पुनः "देवस्यत्वा+आददे, इति ईशानपात्रात् कुशोदकञ्च तत्रैव निनीय सम्मेळितं सर्वं प्रणवेनालोड्य दशवारं प्रणवञ्च जपित्वा तत्र पञ्चगव्ये तद्देवता गाः पूजयेत्—आगावो अग्मन्-उतभद्रमक्रन्। सीदन्तुगोष्ठे-रणयन्त्वस्मे ॥ प्रजावतीः-पुरुरूपाः-इहस्युः। इन्द्राय पूर्वीः-उषसोदुहानाः ॥ अस्मिन् पञ्चगव्ये गोदेवताः ध्यायामि आवाहयामि पञ्चगव्य देवताभ्यो नमः आसनं समर्पयामि +पुष्पैः पूजयामि । ओम् गोदेवतायै नमः कामधेनवे नमः

कमलायै नमः करुणानिधये नमः कल्याण्यै नमः कुन्दरदनायै नमः बिमलायै नमः वत्सवत्सलायै नमः नन्दिन्यै नमः शबलायै नमः धेनवे नमः दिलीपवरदायै नमः दयायै नमः पापहीनायै नमः पयोदात्र्यै नमः पावनायै नमः पल्लवारुणायै नमः वसिष्ठवरदायै नमः वन्द्यायै नमः विश्वामित्रभयप्रदायै नमः हविः प्रदायै नमः हतखलायै नमः सर्वदायै नमः सर्ववन्दितायै नमः गोदेवतायै नमः नानाविधपरिमलपत्रपुष्पाणि समर्पयामि। धूपाद्युपचारान् (पूर्ववत्) कृत्वा अग्निम् गोसूक्त जपकर्मणि सर्वेभ्यो ब्राह्मणेभ्यो नमः इति ब्राह्मणानभ्यर्च्य तैस्सह गोसूक्तं जपति—

आगावो अग्मन्नुत भद्रमक्रन्। सीदन्तु गोष्ठे रणयन्त्वस्मे। प्रजावतीः पुरुरूपा इहस्युः। इन्द्रायपूर्वीरुषसो दुहानाः। इन्द्रोयज्वने पृणते च शिक्षति। उपेद्ददाति न स्वंमुषायति। भूयो भूयोरयिमिदस्य वर्धयन्। अभिन्नेखिल्ले निदधाति देवयुम्। नतानशन्ति नदभाति तस्करः। नैनं अमित्रो व्यथिरादधर्षति। देवाश्चयाभिर्यजते ददाति च। ज्योगित्ताभिस्सचते गोपतिस्सह। नता अर्वा रेणुकाकटो अश्वुते। न स उस्कृतत्रमुपयन्ति ता अभि। उरुगायमभयन्तस्य ता अनु। गावोमर्त्यस्य विचरन्ति यज्वनः। गावो भगो गाव इन्द्रो मे अच्छात्।

गावस्सोमस्य प्रथमस्य भक्षः । इमा या गाव स्स जनास इन्द्रः ।
इच्छामीद्धृदामनसा चिदिन्द्रम् । यूयङ्गावोमेदयथा कृशञ्चित् ।
अश्लीलञ्चित्कृणुथा सुप्रतीकम् । भद्रं गृह ङ्कृणुथ भद्रवाचः ।
बृहद्वो वय उच्यते सभासु । प्रजावतीस्सूयवस ँरिशन्तीः ।
शुद्धा अपस्सुप्रपाणे पिबन्तीः । मावस्तेनईशत माघशँसः ।
परिवोहेनी रुद्रस्य वृञ्ज्यात् । उपेदमुपपर्चनम् । आसुगोषूपपृच्यताम् ।
उपरषभस्य रेतसि । उपेन्द्र तव वीर्ये ॥

पञ्चगव्यदेवताभ्यो नमः आसनादि समस्तोपचारैः पूजयामि अगावो अग्मन्+उषसोदुहानाः" ॥ अस्मात् पञ्चगव्यात् आवाहिता गोदेवताः यथास्थानं प्रतिष्ठापयामि+शोभनार्थे क्षेमाय पुनरागमनाय च । पवित्रं कर्णेनिधाय, यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके। प्राशनं पञ्चगव्यस्य दहत्वग्निरिवेन्धनम् ॥ इति पञ्चगव्यं प्राश्य पवित्रं विसृज्याचामेत् ॥ शम् ॥

॥ श्रीगुरुभ्यो नमः ॥

॥ कूश्माण्डहोमविधिः ॥

॥ तत्र आदौ श्रुत्युक्तकूश्माण्डहोमविधिः ॥

वातरशनाह वा ऋषयः श्रमणा ऊर्ध्वमन्थिनो बभूवु स्तानृषयोऽर्श्यमायꣳस्तेनिलायमचरꣳस्तेऽनुप्रविशुः कूश्माण्डानि ताꣳस्ते-ष्वन्वविन्दञ्छ्रद्धयो च तपसाच तानृषयोऽब्रुवन् कथा निलायꣳचरथेति त ऋषीनब्रुवन्नमोवोऽस्तु भगवन्तोऽस्मिन् धाम्नि केन व स्सपर्या मेति तानृषयोऽब्रुवन् पवित्रन्नो ब्रूत येनारेपसस्स्यामेति त एतानि सूक्तान्यपश्यन् यदेवा देवहेळन ꣳयददीव्यन्नृणमहं बभूवायुष्टे विश्वतो दधदित्येतैराज्य ञ्जुहुत वैश्वानराय प्रतिवेदयाम इत्युपतिष्ठत यदेवाचीनमेनोभ्रूणहत्याया स्तस्मान्मोक्ष्यध्व इति त एतैरजुहवुस्तेऽ-रेपसोऽभवन् कर्मादिष्वेतैर्जुहुयात् पूतो देवलोकान् त्समश्नुते" ॥

कूश्माण्डैर्जुहुयाद्योऽपूत इव मन्येत यथास्तेनो यथा भ्रूणहैवमेष
भवति योऽयोनौ रेतः सिञ्चति यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान्मुच्यते
यावदेनो दीक्षामुपैति दीक्षित एतैस्सततिं जुहोति संवत्सरन्दीक्षितो
भवति संवत्सरा देवात्मानं पुनीते मासन्दीक्षितो भवति यो मास स्स
संवत्सरस्संवत्सरा देवात्मानं पुनीते चतुर्विंशतिं रात्रीं दीक्षितो भवति
चतुर्विंशतिरर्धमासास्संवत्सर स्संवत्सरा देवात्मानं पुनीते द्वादश
रात्रीं दीक्षितो भवति द्वादश मासास्संवत्सरस्संवत्सरा देवात्मानं
पुनीते षड्रात्रीं दीक्षितो भवति षड्वा ऋतव स्संवत्सरस्सं
वत्सरा देवात्मानं पुनीते तिस्रोरात्रीर्दीक्षितो भवति त्रिपदा गायत्री
गायत्रिया एवात्मानं पुनीते न मांसमश्नीयान्न स्त्रियमुपेयान्नोपर्यासीत
जुगुप्सेतानृतात्पयो ब्राह्मणस्य व्रतं यवागू राजन्यस्यामिक्षा वैश्य-
स्याथो सौम्येऽप्यध्वर एतद्व्रतं ब्रूयाद्यदि मन्येतोपदस्यामीत्योदन
न्धानास्सक्तून् घृतमित्यनुव्रतयेदात्मनोऽनुपदासाय ॥ इति ॥

अथ जमदग्निप्रोक्त कूश्माण्डहोमविधिः

अथातः संप्रवक्ष्यामि कूश्माण्डविधिमुत्तमम् ।
एनसांस्थूलसूक्ष्माणां प्रायश्चित्तं तु वैदिकम् ॥
अकुर्वन् विहितं कर्म निन्दितंच समाचरन् ।
प्रसजंश्चेन्द्रियार्थेषु प्रायश्चित्ती भवेद्द्विजः ॥
केशश्मश्रुवापयित्वा स्नात्वा पुण्यजलाशये ।
प्रतिष्ठाप्य तथैवाग्निं स्वगृह्योक्तविधानतः ॥
आज्यभागानन्तरन्तु कूश्माण्डैर्जुहुयाद्द्विजः ।
"यद्देवा"द्यनुवाकैस्तु त्रिभिर्हुत्वाऽऽज्यमन्वहम् ॥
"वैश्वानुरा"नुवाकेन तमग्निमुपतिष्ठते ।
"यदित्याधाय समिधं जयादि प्रतिपद्यते ॥
कर्मादिष्वेव जुहुयात् पूतःस्वर्गं समश्नुते ।
संवत्सरं ब्रह्महा तु मासं वै वीरहा द्विजः ॥
चतुर्विंशतिरात्रीस्तु परिवेत्ता तु दीक्षितः ।
द्वादश त्वग्रदिधिषुः षड्रात्रीः श्यावदन्नपि ॥
तिस्रो रात्रीस्तु कुनखी दीक्षितोभवतिद्विजः ।
न मांसमन्नमश्नीयात् नोपेयात् कामिनीमपि ॥
नोपर्यासीत खट्वायां जुगुप्सेतानृताद्द्विजः ।
पयो व्रतं ब्राह्मणस्य यवागूः क्षत्रियस्य च ॥
आमिक्षा चैव वैश्यस्य प्रायश्चित्तार्थमिष्यते ।
सावित्रीञ्च जपेन्नित्यं पवित्राणि च शक्तितः ॥
सर्वेष्वेव व्रतेष्वेवं प्रायश्चित्तार्थमिष्यते ॥ इति ॥

॥ अथ बोधायनोक्त कूश्मण्डहोमविधिः ॥

(1) अथ कूश्माण्डै र्जुहुयाद्योऽपूत इवमन्येत । (2) यथास्तेनो यथा भ्रूणहैवमेष भवति योऽयोनौ रेतस्सिञ्चति । (3) यदर्वाचीनमेनो भ्रूणहत्याया स्तस्मान्मुच्यत इति । (4) अयोनौ रेतस्सिक्त्वाऽन्यत्र स्वप्नात् । (5) अरेपावा पवित्रकामोवा । (6) अमावास्यायां पौर्णीमास्यां वा केशश्मश्रुलोमनखानि वापयित्वा ब्रह्मचारिकल्पेन व्रतमुपैति । (7) संवत्सरं चतुर्विंशत्यहो द्वादश रात्रीः षट् तिस्रो वा। (8) न मांसमश्नीयान्न स्त्रियमुपेयान्नोपर्यासीत जुगुप्सेतानृतात् । (9) पयोभक्ष इति प्रथमः कल्पः । (10) यावकं वोपयुञ्जानः कृच्छ्रद्वादशरात्रञ्चरेत् भिक्षेद्वा तद्विधिषु यवागूं राजन्यो वैश्य आमिक्षाम् । (11) पूर्वाह्णे पाकयज्ञधर्मेणाग्निमुपसमाधाय सम्परिस्तीर्य आग्निमुखात्कृत्वा "यद्देवा देवहेळनं" "यददीव्यन्नृणं" "आयुष्टे विश्वतो दधत्" इत्येतैस्त्रिभिरनुवाकैः प्रत्यृचमाज्यस्यहुत्वा "सिꣳहेव्याघ्र" इति चतस्रस्स्रुवाहुतीर्जुहोति "अग्नेऽभ्यावर्तिन्" "अग्ने अङ्गिरः "पुनरूर्जा" "सहरय्या" इति चतस्रोऽभ्यावर्तिनीर्हुत्वा समित्पाणिर्यजमानलोकेऽवस्थाय "वैश्वानराय प्रतिवेदयाम" इति द्वादशर्चेन सूक्तेनोपस्थाय "यन्मेमनसावाचा+ यथातथ"ꣳस्वाहेति समिधमाधाय वरं ददाति । (12) जयादि प्रभृति सिद्धमाधेनुवरप्रदानात् । (13) एक एवाग्नौ परिचर्यायाम् (14) अग्न्याधेये "यद्देवा" "यददीव्यन्" "आयुष्टे" इति पूर्णाहुतिम् । (15) हुत्वाऽग्निहोत्रमारप्स्यमानो दशहोत्रा हुत्वा दर्शपूर्णमासावारप्स्यमानश्चतुर्होत्रा हुत्वा चातुर्मास्यान्यारप्स्यमानः पञ्चहोत्रा हुत्वा पशुबन्धेन षड्ढोत्रा सोमे सप्तहोत्रा (16) विज्ञायते

कर्मादिष्वेतैर्जुहुयात् पूतोदेवलोकान् समश्नुत इति हि ब्राह्मणं इति हि ब्राह्मणम् ॥ इति ॥

॥ अथ कर्मविपाकोक्त कूश्माण्डहोमविधिः ॥

अथ कूश्माण्डहोमविधिः मन्त्रपाठानुक्रमसहितः प्रदर्श्यते । तत्रैको जमदग्निप्रोक्तः पकहोमादिरहितः लघुकल्पः प्रदर्शितः । अपरश्च पकहोमादिसहितो गुरुकल्पः बोधायनप्रोक्तो निरूपितः । सर्वशाखाधिकरणन्यायेन बहुभिर्निरूपितः कूश्माण्डहोमः एक एवेति गुणोपसह्मारन्यायेनाविरुद्धसकलाङ्गोपसह्मारः कर्तव्यः । अथवा "एनसि गुरुणि गुरूणि लघुनि लघूनि" इति गौतमस्मरणात् अपनोद्यपापाल्पत्वे लघुपक्षः स्वीकार्यः इतरथा गुरुपक्षादर इति व्यवस्था । यो महापातकादिदूषितः कृतप्रायश्चित्तोऽपि मनः परितोषं न प्रतिपद्यते, यश्चार्यः अगम्यायां अयोनौवा रेतस्सिञ्चति, यश्च ब्रह्महत्यावर्जं साक्षात् द्वादशवार्षिकादिगुरुप्रायश्चित्तानामविषयाणि महापातकानि करोति, योऽपि पवित्रकामः स कूश्माण्डहोमं कुर्वीत । यश्चाधानादि कर्म चिकीर्षति सोऽपि कर्मादिषु कूश्माण्डीभिर्जुहुयात् इति ॥

अथ कूश्माण्डहोमोपक्रमप्रकारः ॥

अमावास्यायां पौर्णमास्यां अन्यत्रवा विहितकाले कूश्माण्डैर्होष्यन् यजमानः प्रातस्स्नानसन्ध्योपासनगायत्रीजपौपासनानि (नित्य कर्माणि) कृत्वा होमारम्भात् पूर्वं केशश्मश्रुलोमनखानि वापयित्वा धौतवस्त्रपुण्ड्रयज्ञोपवीतधारण पुण्याहवाचन तत्तीर्थप्रोक्षणनिषेवणानि

कुर्यात् । अथ, अनुज्ञा विघ्नेश्वर पूजा होमसङ्कल्प ग्रहप्रीणन अभ्युदय तदङ्गपुण्याहवाचन पुरस्सरं कूश्माण्डैर्जुहुयात् । तत्र विहितेषु संवत्सर मास चतुर्विंशत्यह द्वादशाह षडह त्र्यह दीक्षापक्षेषु एनसां तारतम्येनान्यतमः पक्षः आश्रयणीयः । तथा बहुभिर्दिवसैः कूश्माण्डहोमकरणे प्रथमदिवसे शुभे+प्रीत्यर्थं भ्रूणहत्याया अर्वाचां एनसां निर्हरणार्थं संवत्सरं मासं चतुर्विंशतिं रात्रीः द्वादश रात्रीः षड्रात्रीः तिस्रोरात्रीर्वा (यथासम्भवमुक्त्वा) कूश्माण्डैर्होष्ये इति सङ्कल्पः कार्यः । द्वितीयादिदिवसे तु शुभे+प्रीत्यर्थं..एनसांनिर्हरणार्थं उद्दिष्टदीक्षापक्षानुसारेण, कूश्माण्डैर्होष्ये इत्येवालम् । किंच द्वितीयादिदिवसे वापननूतनयज्ञोपवीतधारण शुद्ध्यर्थपुण्याहवाचन होमानुज्ञा विघ्नेश्वरपूजा निर्दिष्टविशेषसङ्कल्प अभ्युदय तदङ्गपुण्याहवाचनानि वर्जयित्वा उक्तसामान्यसङ्कल्पपुरस्सरं अन्यत् कर्मजातं आरम्भदिवसवत् समाचरेत् ॥

अन्यच्च एनोनिवृत्तिं अपूतत्वशङ्कानिवृत्तिं श्रौतस्मार्तकर्माधिकारसिद्धिंवा उद्दिश्य पूतत्वासद्धयर्थं क्रियमाणोऽयं कूश्माण्डहोमः सर्वथा सङ्गवकाले धार्ये औपासनाग्नौ कार्यः । दैवादौपासनस्य विच्छित्तौ पूर्वदिवसे होमारम्भदिवसेवा प्रातः स्नातसन्ध्योपासनानन्तरं अग्निसन्धानमौपासनञ्च कृत्वा तदग्नौ स्वगृह्योक्तविधिना कार्यः । एवञ्च उपनयनविवाहादिषु देवपितृकार्यादिषु आधानादिषु वा अयं होमः पूतत्वाय कर्तव्य इति सिद्धयति ॥

कूश्माण्डहोमार्थं पठितानि "यद्देवा देवहेळनं" इत्यादीनि सूक्तानि कूश्माण्डानि इत्यभिधीयन्ते "तेऽनुप्रविशुः कूश्माण्डानि" "तएतानि सूक्तान्यपश्यन्" इत्यादिश्रुतेः । कूश्मितं प्रकम्पितं प्रतापितं वा अण्डं ब्रह्माण्डं येषां तेजसा तानि कूश्माण्डानि सूक्तानीत्यर्थः ॥

॥ अथ कूश्माण्डहोमप्रयोगः ॥

यजमानः पत्न्यासह ब्राह्मणान् अनुज्ञापयेत् ॥ आदौ-द्विराचम्य "ऋध्यास्म हव्यैर्नमसोपसद्य । मित्रन्देवं मित्रधेयन्नो अस्तु । अनूराधान् हविषा वर्धयन्तः । शतञ्जीवेम शरदस्सवीराः ॥" इति यजमानः स्वयं वदन् आचार्यानुगृहीतं पवित्रं धृत्वा "ओम् नमस्सदसे-नमस्सदसः - पतये - नमस्सखीनां - पुरोगाणां - चक्षुषे - नमोदिवे - नमः पृथिव्यै" ॥ "सप्रथ - सभां मे - गोपाय । येचसभ्याः-सभासदः । तान्-इन्द्रियावतः कुरु । सर्वमायुः-उपासताम्" ॥

सर्वेभ्यो ब्राह्मणेभ्योनमः, इति नमस्कृत्य दक्षिणाताम्बूलं गृहीत्वा अशेषे हे परिषत् भवत्पादमूले मया समर्पितां इमांसौवर्णीं दक्षिणां किञ्चिदपि यथोक्तदक्षिणामिव ताम्बूलञ्च स्वीकृत्य (ब्राह्मणेभ्यो दक्षिणा दिकं दत्वा)....नक्षत्रे....राशौ जातस्य....शर्मणः मम.... नक्षत्रे..राशौ जातायाः.....नाम्न्याः मम धर्मपत्न्याश्च आवयोः जन्मप्रभृति एतत्क्षणपर्यन्तं भ्रूणहत्याया अर्वाञ्चि यावन्त्येनांसि सम्भावितानि तावतां सर्वेषां एनसां निर्हरणार्थं संवत्सर मास चतुर्विंशत्यह द्वादशाह षडह त्रयह दीक्षापक्षेषु....अन्यतमं पक्षमाश्रित्य अथवा सकृत् कूश्माण्डै र्होतुं योग्यतासिद्धिरस्त्विति भवत्यनुगृहाण । (योग्यतासिद्धिरस्तु इति ब्राह्मण प्रतिवचनम्) इति ब्राह्मणाननुज्ञाप्य

[1]विघ्नेश्वरं सम्पूज्य, दर्भेष्वासीनः दर्भान् धारयमाणः पत्न्या दर्भै रन्वारब्धः सङ्कल्पं कुर्यात् । शुक्लाम्बरधरं+शान्तये ॥ ओम् भूः+. सुवरोम् । शुभे+शुभतिथौ ममोपात्त+प्रीत्यर्थं आवयोः जन्मप्रभृति जन्माभ्यासात् एतत्क्षणपर्यन्तं भ्रूणहत्याया अर्वाक्चि यावन्त्येनांसि सम्भावितानि तावतां सर्वेषामेनसां निर्हरणार्थं संवत्सर मास चतुर्विंशत्यह द्वादशाह षडह त्र्यह दीक्षापक्षेषु. . . .अन्यतमं.पक्षमाश्रित्य अथवा सकृत् कूश्माण्डैर्होष्ये इति सङ्कल्प्य पत्न्यर्थं पुनः प्राणानायम्य पत्नीं पूर्ववत् सङ्कल्पयित्वा उत्तरतो दर्भान्निरस्य अप उपस्पृश्य पत्नीञ्च अप उपस्पर्शयित्वा "गणानांत्वा+सीदसादनम्" अस्मात् हरिद्राबिम्बात् आवाहितं महागणपतिं यथास्थानं प्रतिष्ठापयामि इति विघ्नेश्वरमुद्वास्य तत्प्रसादं शिरसा गृह्णीयात् ॥

अथ [2]गृहप्रीतिं [3]अभ्युदयं तदङ्ग[4]पुण्याहवाचनञ्च कृत्वा (औपासनाग्निः अन्यत्र रक्षितश्चेत्) शुचौदेशे स्थण्डिले दक्षिणतः प्राचीस्तिस्रः पश्चिमतः उदीचीश्च तिस्रोलेखाः उल्लिख्य शकलं निधाय सशेषमद्भिः अवोक्ष्य शकलं नैरृत्यां निरस्य अप उपस्पृश्य "भूर्भुव-स्सुवरोम्" इति रक्षितमग्निं प्रतिष्ठाप्य अवोक्षणतोयशेषं प्रागुत्सिच्य प्राक्तोयमन्यन्निधाय (औपासनाग्निः पूर्वं स्थण्डिल एव निहितश्चेत् तं) अग्निमिध्वा प्रागग्रैः उदगग्रैश्च दर्भैः अग्निं, पुरस्तात् दक्षिणतः पश्चात्

---

1. 21வது பக்கத்தில் பார்க்கவும்
2. 23வது பக்கத்தில் பார்க்கவும்
3. 23வது பக்கத்தில் பார்க்கவும்
4. 24வது பக்கத்தில் பார்க்கவும்.

उत्तरतः परिस्तीर्य दक्षिणानुत्तरान् उत्तरानधरांश्च कृत्वा अग्नेरुत्तरतः दर्भान् संस्तीर्य तेषु द्वन्द्वं न्यञ्चि पात्राणि-दर्व्याज्यस्थाल्यौ, प्रोक्षणीप्रणीतापात्रे, इध्मेतरदर्व्यौ च-सादयित्वा (पवित्रयोस्संस्कारः) समौ साग्रौ दर्भौ तृणं काष्ठवाऽन्तर्धाय छित्वा प्रादेशमात्रे पवित्रे कृत्वा अप उपस्पृश्य अद्भिरनुमृज्य सपवित्रेण पाणिना पात्राणि संमृश्य, (प्रोक्षणीसंस्कारः) अग्नेः पश्चात् उदगग्रान् दर्भान् संस्तीर्य तेषु प्रोक्षणीपात्रं निधाय अक्षतैस्सह अप आसिच्य उदगग्राभ्यां पवित्राभ्यां प्राचीः त्रिरुत्पूय पात्राण्युत्तानानि कृत्वा इध्मञ्च विस्रस्य सपवित्रेण उत्तानपाणिना पात्राणि सर्वाभिरद्भिः त्रिः प्रोक्ष्य प्रोक्षणीपात्रं दक्षिणतो निधाय (प्रणीतासंस्कारः) प्रणीतापात्रमादाय अग्नेः पश्चात् दर्भेषु निधाय तस्मिन्नप आनीय उदगग्राभ्यां पवित्राभ्यां ता अपः त्रिरुत्पूय समं प्राणैर्हृत्वा उत्तरेणाग्निं पृथग्दर्भेषु सादयित्वा दर्भैः प्रच्छाद्य वरुणाय नमः सकलाराधनैः स्वर्चितम् इत्यभ्यर्च्य ब्राह्मणं दक्षिणतो दर्भेषु निषाद्य अस्मिन् कूश्माण्डहोमकर्मणि ब्रह्माणं त्वां वृणे ब्रह्मणे नमः सकलाराधनै स्स्वर्चितम् इत्यभ्यर्च्य (आज्यसंस्कारः) आज्यं विलाप्य अग्नेः पश्चादाज्यस्थालीं निधाय तस्यामाज्यं निरुप्य उदीचोऽङ्गारान् परिस्तरणाद्बहिः उदीच्यां निरूह्य तेष्वाज्यमधिश्रित्य ज्वलता तृणेनावद्योत्य द्वे दर्भाग्रे प्रच्छिद्य प्रक्षाल्य प्रत्यस्य त्रिः पर्यग्निकृत्वा उदगुद्वास्य अङ्गारानग्नौ प्रत्यूह्य अग्नेः पश्चात् दर्भेष्वाज्यस्थालीं निधाय उदगग्राभ्यां पवित्राभ्यां पुनराहारमाज्यं त्रिरुत्पूय पवित्रे (पवित्रग्रन्थिं विस्रस्य, अप उपस्पृश्य) प्रागग्रमग्नौ प्रहरति । (दर्वीसंस्कारः) येन जुहोति तदग्नौ प्रतितप्य दर्वीद्वयं दर्भैस्संमृज्य पुनः प्रतितप्य प्रोक्ष्य निधाय दर्भानद्भिः संस्पर्श्य अग्नौ प्रहरति ॥

अथ परिधीन् परिदधाति—अग्नेः पश्चात् स्थविष्ठो मध्यमः (उदग्रः परिधिः) अणीयान् द्राघीयान् दक्षिणार्ध्यः (प्रागग्रः परिधिः) । अणिष्ठो ह्यसिष्ठ उत्तरार्ध्यः (प्रागग्रः परिधिः) एतान् परिधीन् अन्योन्य-संसृष्टान् कृत्वा द्वे आघारसमिधौ मध्यमं परिधिमुपस्पृश्य ऊर्ध्वे दक्षिणत उत्तरतश्च अग्नावादधाति ॥

अथाग्निं परिषिञ्चति—अदितेऽनुमन्यस्व, (दक्षिणतः प्राचीनम्) अनुमतेऽनुमन्यस्व, (पश्चादुदीचीनम्) सरस्वतेऽनुमन्यस्व, (उत्तरतः प्राचीनम्) देव सवितः प्रसुव, इति समन्तं परिषिच्य इध्ममाज्ये-नाभ्यज्य अस्मिन् कृश्माण्डहोमकर्मणि ब्रह्मन् इध्ममाधास्ये इति ब्रह्माणं पृष्ट्वा (ओम् आधत्स्व) इति ब्रह्मणा प्रत्युक्ते इध्ममग्नावादध्यात् ॥

अथाघारावाघारयति—प्रजापतिं मनसा ध्यायन् इतरदर्व्या जुहो-ति-वायव्यादाग्नेयान्तं, स्वाहा-प्रजापतय इदं न मम । प्रधानदर्व्या जुहोति-नैर्ऋतादैशानान्तं, स्वाहा-इन्द्रायेदं न मम ॥ अथाज्यभागौ यजति—*(வடபாகத்தில்)* "अग्नयेस्वाहा"-अग्नय इदं न मम । *(தென்பாகத்தில்)* "सोमाय स्वाहा"-सोमायेदं न मम ।[1] सङ्कल्पप्रभृति मध्ये सम्भावितसमस्तदोषप्रायश्चित्तार्थं सर्वप्रायश्चित्तं होष्यामि *(நடுவில்)* "ओम् भूर्भुवस्सुवस्स्वाहा"-प्रजापतय इदं न मम ॥—

---

1. अथात्र चरुहोमपक्षे-(मध्ये) "अग्नये स्वाहा" अग्नय इदं न मम । सङ्कल्पप्रभृति एतत्क्षणपर्यन्तं मध्ये सम्भावितसमस्त-

अथ कूश्माण्डहोममन्त्राः

ओम् यदेवाः, देवहेळनं, देवासः, चकृमावयम् । आदित्याः, तस्मान्मा, मुञ्चत, ऋतस्यतेन, मामितस्वाहा ॥ देवेभ्यः आदित्येभ्यः इदं नमम ॥ देवाः, जीवनकाम्याः, यद्वाचा, अनृतमूदिम । तस्मान्नः, इहमुञ्चत, विश्वेदेवाः, सजोषसः, स्वाहा ॥ विश्वेभ्यो देवेभ्यः इदं नमम ॥ ऋतेन, द्यावापृथिवी, ऋतेन त्वं, सरस्वति ।

दोषप्रायश्चित्तार्थं सर्वप्रायश्चित्तं होष्यामि—"ओम् भूर्भुवस्सुवस्स्वाहा" प्रजापतय इदं न मम । चरुं श्रपयित्वा अभिघार्य उदीचीनमुद्वास्य प्रातिष्ठितमभिघार्य प्रधानदर्व्यामुपस्तीर्य चरुं द्विरवदाय (पञ्चावत्तिनां त्रिः) सकृदभिघार्य "ओम् तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो योनः प्रचोदयादोम् तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो योनः प्रचोदयात्स्वाहा-देवाय सवित्र इदं न मम । पुनः पूर्ववत् दर्व्यामुपस्तीर्य सकृदवदाय (पञ्चावत्तिनांद्विः) अन्तः परिधि सादयित्वा "यदेवाः" इत्यादिमन्त्रैः आज्याहुतयः कार्याः ॥

कृतान्नैः, पाहि, एनैसः, यत्किञ्चं, अनृतमूदिम, स्वाहा ॥ द्यावापृथिवीभ्यां सरस्वत्यै इदं नमम ॥ इन्द्राग्नी, मित्रावरुणौ, सोमो धाता, बृहस्पतिः । तेनोमुञ्चन्तु, एनसः, यदन्यकृतं, आरिम स्वाहा ॥ इन्द्राग्निभ्यां मित्रावरुणभ्यां सोमाय धात्रे बृहस्पतये इदं नमम ॥ सजातशंसात्, उत जामि, शंसात्, ज्यायसः, शंसात्, उतवा, कनीयसः । अनाधृष्टं, देवकृतं, यदेनः, तस्मात्त्वं, अस्माञ्जातवेदः, ममुग्धि स्वाहा ॥ अग्नये जातवेदसे इदं नमम ॥ यद्वाचा, यन्मनसा, बाहुभ्यां, ऊरुभ्यां, अष्ठीवद्भ्यां, शिश्नैः, यदनृतं, चकृमावयम । अग्निर्मा तस्मात्, एनसः, गारहपत्यः, प्रमुञ्चतु, चकृमयानि, दुष्कृता स्वाहा ॥ अग्नयेगार्हपत्याय इदं नमम ॥ येनत्रितः, अर्णवात्, निर्बभूवं, येनसूर्यं, तमसः, निर्मुमोच । येनेन्द्रः, विश्वाः, अजहात्, अरातीः, तेनाहं, ज्योतिषा ज्योतिः, आनशानः, आक्षि स्वाहा ॥ अग्नये ज्योतिषे इदं नमम ॥ यत् कुसीदं, अप्रतीत्तं, मयेहयेन, यमस्य निधिना, चरामि ।

एतत्, तदग्ने, अनृणः, भवामि, जीवन्नेव, प्रतितत्ते, दधामि स्वाहा ॥ अग्नये इदं नमम ॥ यन्मयिमाता, गर्भमसति । एनश्चकार, यत् पिता ॥ अग्निर्मा तस्मात्, एनसः, गार्हपत्यः, प्रमुञ्चतु, दुरिता यानि, चकृम, करोतुमां, अनेनसं, स्वाहा ॥ अग्नये गार्हपत्याय इदं नमम ॥ यदपिपेष, मातरं पितरं, पुत्रः प्रमुदितः, धयन् । अहिꣳसितौ, पितरौ, मयातत्, तदग्ने, अनृणः, भवामि स्वाहा ॥ अग्नये इदंनमम ॥ यदन्तरिक्षं, पृथिवीं, उतद्यां, यन्मातरं, पितरंवा, जिहिꣳसिम । अग्निर्मा, तस्मादेनसः, गार्हपत्यः, प्रमुञ्चतु, दुरितायानि, चकृम, करोतुमां, अनेनसं, स्वाहा ॥ अग्नये गार्हपत्याय इदं नमम ॥ यदाशसा, निशसा, यत्पराशसा । यदेनः, चकृमानूतनं, यत्पुराणम् । अग्निर्मा तस्मात्, एनसः, गार्हपत्यः, प्रमुञ्चतु, दुरिता यानि, चकृम, करोतुमां, अनेनसं, स्वाहा ॥ अग्नये गार्हपत्याय इदं नमम ॥ अतिक्रामामि, दुरितं, यदेनः, जहामिरिप्रं, परमे, सधस्थे ।

यत्रयन्ति, सुकृतः, नापि दुष्कृतः । तमारोहामि, सुकृतान्नु, लोकं, स्वाहा ॥ अग्नये इदं न मम ॥ त्रिते देवाः, अमृजत, एतदेनः, त्रित एनत्, मनुष्येषु, मामृजे । ततोमायदि, किञ्चिदानशे । अग्निर्मा तस्मादू, एनसः, गार्हपत्यः, प्रमुञ्चतु, दुरिता यानि, चकृम, करोतुमां, अनेनसं, स्वाहा ॥ अग्नये गार्हपत्याय इदं नमम ॥ दिविजाताः, अप्सु जाताः, याजाताः, ओषधीभ्यः । अथोयाः, अग्निजा आपः, तानश्शुन्धन्तु, शुन्धनीः, स्वाहा ॥ अद्भ्यः शुन्धनीभ्यः इदं नमम ॥ यदापो नक्तं, दुरित चरॉम, यद्वा दिवा, नूतनं, यत्पुराणम् । हिरण्यवर्णाः, ततः, उत्पुनीतनः, स्वाहा ॥ अद्भ्यो हिरण्य-वर्णाभ्यः इदं नमम ॥ इमं मे वरुण, श्रुधीहवं, अद्याचे मृळय । त्वामवस्युः, आचके स्वाहा ॥ वरुणाय इदं नमम ॥ तत्त्वायामि, ब्रह्मणा, वन्दमानः, तदाशास्ते, यजमानः, हविर्भिः । अहेळमानः, वरुणेह, बोधि, उरुशꣳस, मानआयुः, प्रमोषीः, स्वाहा ॥ वरुणाय इदं नमम ॥ त्वन्नो अग्ने, वरुणस्य विद्वान्, देवस्य हेळः, अव यासिसीष्ठाः ।

यजिष्ठः, वह्नितमः, शोशुचानः, विश्वा द्वेषाꣳसि, प्रमुमुग्धि, अस्मत् स्वाहा ॥ **अग्नये** इदं नमम ॥ स त्वन्नो अग्ने, अवमोभव, ऊती नेदिष्ठः, अस्या उषसः, व्युष्टौ । अवयक्ष्व नः, वरुणं, रराणः, वीहि मृळीकं, सुहवोनः, एधि स्वाहा । **अग्नये** इदं नमम ॥ त्वमग्ने अयासि, अयासन्, मनसा हितः । अयासन्, हव्यमूहिषे, अयानो धेहि, भेषजं, स्वाहा ॥ अग्नये अयसे इदं नमम ॥ यददीव्यन्, ऋणमहं, बभूव, अदितसन्वा, सञ्जगर, जनेभ्यः । अग्निर्मा तस्मात्, इन्द्रश्च, संविदानौ, प्रमुञ्चतां, स्वाहा ॥ अग्नीन्द्राभ्यां इदं नमम ॥ यद्वस्ताभ्यां, चकर, किल्बिषाणि, अक्षाणां, वनुं, उपजिघ्नमानः । उग्रंपश्याच, राष्ट्रभृच्च, तान्यप्सरसौ, अनुदत्तां, ऋणानि स्वाहा ॥ उग्रंपश्याराष्ट्रभृद्भ्यां अप्सरोभ्यां इदं नमम ॥ उग्रंपश्ये, राष्ट्रभृत्, किल्बिषाणि, यदक्षवृत्तं, अनुदत्तमेतत् । नेनः, ऋणान्, ऋणवः, इत्समानः, यमस्य लोके, अधिरज्जुरायं, स्वाहा ॥ उग्रंपश्याराष्ट्रभृद्भ्यां अप्सरोभ्यां इदं नमम ॥ अवते, हळो वरुण, नमोभिः,

अवयज्ञेभिः, ईमहे, हविर्भिः । क्षयन्, अस्मभ्यं, असुर प्रचेतः, राजन् . एनांसि, शिश्रथः, कृतानि, स्वाहा ॥ वरुणाय (असुराय प्रचेतसे राज्ञे) इदं नमम ॥ उदुत्तमं, वरुण पाशं, अस्मत्, अवाधमं, विमध्यमं, श्रथाय । अथावयं, आदित्य व्रते, तवानागसः, अदितये स्याम, स्वाहा ॥ वरुणादित्याभ्यां इदं नमम ॥ इमं मे वरुण, श्रुधीहवं, अद्याचं मृळय । त्वामवस्युः, आचके स्वाहा ॥ वरुणाय इदं नमम ॥ तत्वायामि, ब्रह्मणा वन्दमानः, तदाशास्ते, यजमानः, हविर्भिः ॥ अहेळमानः, वरुणेहबोधि, उरुशंस, मान आयुः, प्रमोषी स्स्वाहा ॥ वरुणाय इदं नमम ॥ त्वन्नोअग्ने, वरुणस्य विद्वान्, देवस्य हेळः, अव-यासिसीष्ठाः । यजिष्ठः, वह्नितमः, शोशुचानः, विश्वा द्वेषांसि, प्रमुमुग्धि, अस्मत्स्वाहा ॥ **अग्नये** इदं नमम ॥ स त्वन्नो अग्ने, अवमोभव, ऊनी नेदिष्ठः, अस्या उषसः, व्युष्टौ । अवयक्ष्वनः, वरुणं, ररॉणः, वीहिमृळीकं, सुहवोनः, एधि स्वाहा ॥ ६ **अग्नये** इदं नमम ॥

सङ्कुॅकुकः, विर्कुकुकः, निरृत्थः, यश्च निस्वनः। ते(१)ऽस्मत्, यक्ष्मं, अनॉगसः, दूराद्दूरं, अचीचतं, स्वाहा॥ अनागोभ्यः देवेभ्यः इदं नमम॥ निर्यक्ष्मं, अचीचते, कृत्यां, निरृतिश्च। तेन यः, अस्मत्, समृच्छातै, तमॅस्मै, प्रसुॅवामसि, स्वाहा।(अनागोभ्यः)देवेभ्यः इदं न मम॥ दुश्शᳪसानुशᳪसाभ्यां, घणेनॅ, अनुघणेनॅच। तेनान्यः, अस्मत्, समृच्छातै, तमॅस्मै, प्रसुॅवामसि, स्वाहा॥ (अनागोभ्यः) देवेभ्यः इदं न मम॥ संवर्चसा, पयॅसा, सन्तनूभिः, अगॅन्महि, मनॅसा, सᳪशिवेनॅ। त्वष्टॉ नो अत्रॅ, विदॅधातु, रायोऽनुॅमार्ष्टु, तन्वः, यद्विलिष्टं, स्वाहा॥ त्वष्ट्रे इद नमम॥ आयुॅष्टे, विश्वतो दधत्, अयमग्निः, वरेण्यः। पुनॅस्ते प्राणः, आयॅाति, परायक्ष्मं, सुवामिते, स्वाहा॥ अग्नये वरेण्याय इदं नमम॥ आयुर्दा ॲग्ने, हविषो जुषाणः, घृतप्रॅतीकः, घृतयॉनिः, एधि। घृतं पीत्वा, मधुॅ, चारु गव्यं, पितेवॅ पुत्रं, अभिरॅक्षतात्, इमम्, स्वाहा॥ आयुर्दे अग्नये (हविषो जुषाणाय घृतप्रतीकाय घृतयोनये) इदं नमम॥ इमम॑ग्ने, आयुॅषे, वर्चॅसे कृधि, तिग्ममोजॅः, वरुण, सᳪशिशाधि,

मातेवास्मै, अदिते, शर्म यच्छ, विश्वे देवाः, जरदष्टिः, यथासत्, स्वाहा ॥ अग्नये वरुणायादितये विश्वेभ्यो देवेभ्यः इदं नमम ॥ अग्न आयूꣳषि, पवसे, आसुवोर्जं, इषꣳ च नः । आरे बाधस्व, दुच्छुनां, स्वाहा ॥ अग्नये इदं नमम ॥ अग्नेपवस्व, स्वपाऽअस्मे, वर्चस्सुवीर्यम् । दधद्रयिं, मयिपोषं, स्वाहा ॥ अग्नये स्वपसे इदं नमम ॥ अग्निर्-ऋषिः, पवमानः, पाञ्चजन्यः, पुरोहितः । तमीमहे, महागयं, स्वाहा ॥ अग्नये(ऋषये पवमानाय पाञ्चजन्याय पुरोहिताय)इदं नमम ॥ अग्नेजातान्, प्रणुदानः, सपत्नान्, प्रत्यजातान्, जातवेदः, नुदस्व । अस्मेदीदिहि, सुमनाः,अहेळन्, शमन्ते स्याम,त्रिवरूथः,उद्भौ स्वाहा॥अग्नये जातवेदसे इदं नमम॥सहसा जातान्, प्रणुदानः, सपत्नान्, प्रत्यजातान्, जातवेदः, नुदस्व । अधिनो ब्रूहि, सुमनस्यमानः, वयꣳस्याम, प्रणुदानः, सपत्नान्, स्वाहा ॥ अग्नये जातवेदसे (सुमनस्यमानाय) इदं नमम ॥ अग्नेयोनेः, अभितोजनेः,वृकोवारेः,जिघाꣳसति । ताꣳस्त्वं वृत्रहन्, जहि,वस्वस्मभ्यं, आभर स्वाहा ॥ अग्नये वृत्रघ्ने इदं नमम ॥ अग्ने योनेः, अभिदासति,

समानः, यश्च निष्ट्यः । तं वयं, समिधं कृत्वा, तुभ्यमग्ने, अपिदध्मसि, स्वाहा ॥ अग्नये इदं नमम ॥ यो न शपात्, अशपतः, यश्चनः, शपतः, शपात् । उषाश्च, तस्मै निम्रक्चे, सर्वं पापं, समूहतां, स्वाहा ॥ उषेनिम्रग्भ्यां इदं नमम । यो नः स्सपत्नः, योरणः, मर्तः, अभिदासति देवाः । इध्मस्येव, प्रक्षायतः, मा तस्य, उच्छेषि, किञ्चन स्वाहा ॥ देवेभ्यः इदं नमम ॥ योमान्द्वेष्टि, जातवेदः, यञ्चाहं द्वेष्मि, यश्चमाम् । सर्वान्, तानग्ने, सन्दह, याँश्चाहं द्वेष्मि, येच मां, स्वाहा ॥ जातवेदसे अग्नये इदं नमम ॥ योअस्मभ्यं, अरातीयात्, यश्चनः, द्वेषते जनः । निन्दाद्यः, अस्मान् दिप्साच्च, सर्वाँस्तान्, मष्मषाकुरु, स्वाहा ॥ अग्नये इदं नमम ॥ सँशितं मे, ब्रह्म, सँशितं, वीर्यं, बलम् । सँशितं, क्षत्रं मे, जिष्णु, यस्याहमस्मि, पुरोहितः, स्वाहा ॥ अग्नये इदं नमम ॥ उदेषां, बाहू अतिरं, उद्वर्चः, अथो बलम् । क्षिणोमि, ब्रह्मणा, अमित्रान्, उन्नयामि, स्वा(२)म्

अहम्, स्वाहा ॥ अग्नये इदं नमम ॥ पुनर्मनः, पुनरायुर्मे, आगात्, पुनश्चक्षुः, पुनः, श्रोत्रमे, आगात्, पुनः प्राणः, पुनः, आकूतमे, आगात्, पुनश्चित्तं, पुनः, आधीतमे, आगात् ॥ वैश्वानरः, मेऽदब्धः, तनूपाः, अवबाधतां, दुरितानि, विश्वा स्वाहा ॥ वैश्वानराय अदब्धाय तनूपे इदं न मम* ॥

---

* இத்துடன் ச்ருதியில் சொன்ன ப்ரதான ஹோமம் முடிந்ததால் இங்கு அதைச்சேர்ந்த ஸ்விஷ்டகிருச்சரு ஹோமம் செய்ய வேண்டும். போதாயனமதப்படி இன்னும் எட்டு ஹோமங்கள்1 செய்வதானால் அதர்க்குப் பிறகு ஸ்விஷ்டகிருச்சருஹோமம்2. இதர்க்குப்பிறகு ஜயாதிஹோமம்முதல் உபஸ்தானம் முடிய எல்லாம் மேலே எழுதப்பட்டுள்ளது. ஜயாதிஹோமம் செய்யாத பக்ஷத்தில் அதர்க்குமேல் உள்ள அவிக்ங்யாதஹோமத் திலிருந்து எல்லாம் ஸமம். இதில் சிலர் ப்ரதான ஹோமமானதுமே உபஸ்தானத்தையும்3. செய்தபிறகு ஸ்விஷ்டகிருச்சருஹோமம் ஜயாதிஹோமம் முதலியதைச் செய்கிறார்கள். இத்துடன் வேறு சில வித்யாஸங்களையும் மூலக்ரந்த தாத்பர்ய ந்யாயங்களுடன் பரிசீலித்து இதில் அனுஷ்டிக்க வேண்டிய க்ரமப்படி ப்ரயோகம் எழுதியுள்ளது.

1. अथात्र बोधायनमतेन अष्टौ होमाः—"सिंहेव्याघ्रे उत या पृदाकौ । त्विषिरग्नौ, ब्राह्मणे, सूर्ये या । इन्द्रय्या देवी

सुभगा, जजान । सान आगन्, वर्चसा, संविदाना स्वाहा ॥ त्विष्यै देव्यै इदं नमम ॥ या राजन्ये, दुन्दुभौ, आयतायाम् । अश्वस्य क्रन्दे, पुरुषस्य मायौ ॥ इन्द्रय्या देवी+विदाना स्वाहा ॥ त्विष्यै देव्यै इदं न मम ॥ या हस्तिनि, द्वीपिनि, या हिरण्ये । त्विषिरश्वेषु, पुरुषेषु गोषु । इन्द्रं+विदाना स्वाहा ॥ त्विष्यै देव्यै इदं न मम ॥ रथे अक्षेषु, वृषभस्य, वाजे । वाते पर्जन्ये, वरुणस्य, शुष्मे ॥ इन्द्रं+विदाना स्वाहा ॥ त्विष्यै देव्यै इदं न मम ॥ अग्नेऽभ्यावर्तिन्, अभिनः, आवर्तस्व, आयुषा वर्चसा, सन्या मेधया, प्रजया धनेन, स्वाहा ॥ अग्नये अभ्यावर्तिने इदं नमम ॥ अग्ने अङ्गिरः, शतन्ते सन्तु, आवृतः, सहस्रन्ते, उपावृतः । तासां पोषस्य, पोषेण, पुनर्नो नष्टं, आकृधि, पुनर्नो रयिं, आकृधि, स्वाहा ॥ अग्नये अभ्यावर्तिने इदं नमम ॥ पुनरूर्जा, निवर्तस्व, पुनरग्ने, इषाऽऽयुषा । पुनर्नः पाहि, विश्वतः, स्वाहा ॥ अग्नये अभ्यावर्तिने इदं न मम ॥ सह रय्या, निवर्तस्व, अग्ने पिन्वस्व, धारया ।

विश्वप्स्न्या, विश्वतः, परि स्वाहा ॥ अग्नये अभ्यावर्तिने इदं नमम ॥

2. पूर्वं अन्तःपरिधिसादितं स्विष्टकृद्धविरादाय द्विरभिघार्य-"हव्यवाहं, अभिमातिषाहं, रक्षोहणं, पृतनासु, जिष्णुम् । ज्योतिष्मन्तं, दीदिवंसं, पुरन्धिं, अग्निं, स्विष्टकृतं, आहुवेमोम् ॥ स्विष्टमग्ने, अभि, तत्पृणाहि, विश्वादेव, पृतनाः, अभिष्य । उरुन्नः, पन्थां, प्रदिशन्, विभाहि, ज्योतिष्मद्धेहि, अजरन्नः, आयुस्त्वाहा ॥ *(அக்நியின் வடகிழக்கில் ஹோமம் செய்யவேணும்)* अग्नये स्विष्टकृते इदं न मम ॥

3. उपस्थान मन्त्राः—वैश्वानराय, प्रति वेदयामः, यदीनृणं, सङ्गरः, देवतासु । स एतान्, पाशान्, प्रमुचन्, प्रवेद, स नो मुञ्चातु, दुरितात्, अवद्यात् ॥ वैश्वानरः, पवयान्नः, पवित्रैः, यत्सङ्गरं, अभिधावाम्याशाम् । अनाजानन्, मनसा, याचमानः, यदत्रैनः, अवतत्सुवामि ॥ अमी ये, सुभगे दिवि, विचृतौ, नाम तारके । प्रेहामृतस्य, यच्छतां, एतत्, बद्धकमोचनम् ॥ विजिहीर्ष्व, लोकान्कृधि, बन्धा-

न्मुञ्चासि, बद्धकम्। योनेरिव, प्रच्युतो गर्भः, सर्वान्, पथो अनुष्व ॥ स प्रजानन्, प्रतिगृभ्णीत, विद्वान्, प्रजापतिः, प्रथमजाः, ऋतस्य । अस्मार्भिदत्तं, जरसः परस्तात्, अच्छिन्नं, तन्तुं, अनु सञ्चरेम ॥ ततन्तन्तुं, अन्वेके, अनुसञ्चरन्ति, येषां दत्तं, पित्र्यं, आयनवत् । अबन्ध्वेके, ददतः, प्रयच्छात्, दातुञ्चेत्, शक्त्वाऽसः, स्वर्ग एषाम् ॥ आरमेथां, अनुमरमेथां, समानं पन्थां, अवथो घृतेन । यद्वां पूतं, परिविष्टं, यदग्नौ तस्मै, गोत्रायेह, जायापती, सरमेथाम् ॥ यदन्तरिक्षं, पृथिवी मुत द्यां, यन्मातरंपितरं, वा जिहिंसिम । अग्निर्मा, तस्मादेनसः, गार्हपत्यः, उन्नो नेषत्, दुरिता यानि, चक्रम ॥ भूमिर्माता, अदितिर्नः, जनित्रं, भ्रातान्तरिक्षं, अभिशस्त एनः ॥ द्यौर्नः, पिता पितृयात्, शंभवासि, जामिमित्वा, माविविस्सि, लोकात् । यत्र सुहार्दः, सुकृतो मदन्ते, विहाय रोगं, तन्वा(१)स्वायाम्। अश्लोणाङ्गैः, अह्रुताः, स्वर्गे, तत्र पश्येम, पितरञ्च पुत्रम् ॥ यदन्नमद्मि, अनृतेन देवाः,

दास्यन्, अदास्यन्, उतवा, करिष्यन्। यद्देवानां, चक्षुषि, आगो अस्ति, यदेव किञ्च, प्रतिजग्राहं, अग्निर्मा तस्मात्, अनृणं, कृणोतु ॥ यदन्नमद्मि, बहुधा विरूपं, वासो हिरण्यं, उत गां, अजामविम्। यद्देवानां, चक्षुषि, आगो अस्ति, यदेव किञ्च, प्रतिजग्राहं, अग्निर्मा तस्मात्, अनृणं, कृणोतु ॥ यन्मया, मनसा वाचा, कृतमेनः, कदाचन। सर्वस्मात्, तस्मात्, मेळितः, मोग्धि, त्वं हि वेत्थ, यथा तथम् ॥

॥ श्रीः ॥

॥ कूश्माण्डहोममन्त्राः ॥

यद्देवा देवहेळनन्देवास श्चकृमा वयम् ।

आदित्या स्तस्मान्मा मुञ्चतर्तस्यर्तेन मामित स्वाहा ॥ १

(देवेभ्य आदित्येभ्य इदं नमम)

देवा जीवनकाम्या यद्वाचाऽनृत मूदिम ।

तस्मान्न इह मुञ्चत विश्वे देवा स्सजोषस स्स्वाहा ॥ २

(विश्वेभ्यो देवेभ्य इदं नमम)

ऋतेन द्यावापृथिवी ऋतेन त्वꣳ सरस्वति ।

कृतान्नः पाह्येनसो यत्किञ्चानृत मूदिम स्वाहा ॥ ३

(द्यावापृथिवीभ्यां सरस्वत्या इदं नमम)

इन्द्राग्नी मित्रावरुणौ सोमो धाता बृहस्पतिः ।

तेनो मुञ्चन्त्वेनसो यदन्यकृत मारिम स्वाहा ॥ ४

(इन्द्राग्निभ्यां मित्रावरुणाभ्यां सोमाय धात्रे बृहस्पतये इदं नमम)

सजातशꣳसादुत जामिशꣳसा-

ज्ज्यायसः शꣳसादुत वा कनीयसः ।

अनाधृष्टं देवकृतं यदेनस्तस्मा-

त्वमस्मा जातवेदो मुमुग्धि स्वाहा ॥ ५

(अग्नये जातवेदसे इदं नमम)

यद्वाचा यन्मनसा बाहुभ्यामूरुभ्या-

मष्ठीवद्भ्याꣳशिश्नै र्यदनृत ञ्चकृमा वयम् ।

अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु

चकृम यानि दुष्कृता स्वाहा ॥ ६

(अग्नये गार्हपत्याय इदं नमम)

येन त्रितो अर्णवा न्निर्बभूव

येन सूर्य न्तमसो निर्मुमोच ।

येनेन्द्रो विश्वा अजहा दराती स्तेनाह-

ञ्ज्योतिषा ज्योतिरानशान आक्षि स्वाहा ॥ ७

(अग्नये ज्योतिषे इदं नमम)

यत्कुसीद मप्रतीत्त म्मयेह येन यमस्य निधिना चरामि ।

एतत्तदग्ने अनृणो भवामि जीवन्नेव प्रति तत्ते दधामि स्वाहा ॥

(अग्नये इदं नमम)

यन्मयि माता गर्भे सत्येन श्चकार यत्पिता ।

अग्निर्मा तस्मा देनसो गार्हपत्यः प्रमुञ्चतु

दुरिता यानि चकृम करोतु मा मेनेनसꣳ स्वाहा ॥ ९

(अग्नये गार्हपत्याय इदं नमम)

यदो पिपेष मातरं पितरं पुत्रः प्रमुदितो धयन् ।

अहिꣳसितौ पितरौ मया तत्तदग्ने अनृणो भवामि स्वाहा ॥१०

(अग्नये इदं नमम)

यदन्तरिक्षं पृथिवी मुत द्या य्यन्मातरं

पितरं वा जिहिꣳसिम ।

अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु

दुरिता यानि चकृम करोतु मा मेनेनसꣳ स्वाहा ॥ ११

(अग्नये गार्हपत्याय इदं नमम)

यदाशसा निशसा यत्पराशसा

यदेनश्चकृमा नूतनं यत्पुराणम् ।

अग्निर्मा तस्मा देनसो गार्हपत्यः प्रमुञ्चतु

दुरिता यानि चकृम करोतु मा मनेनसꣳस्वाहा ॥ १२

(अग्नये गार्हपत्याय इदं नमम)

अतिक्रामामि दुरितं यदेनो

जहामि रिप्रं परमे सधस्थे ।

यत्र यन्ति सुकृतो नापि दुष्कृत-

स्तमारोहामि सुकृतान्नु लोकꣳ स्वाहा ॥ १३

(अग्नये इदं न मम)

त्रिते देवा अमृजतैतदेन स्त्रित एत न्मनुष्येषु

मामृजे ततो मा यदि किञ्चिदानशे ।

अग्निर्मा तस्मा देनसो गार्हपत्यः प्रमुञ्चतु

दुरिता यानि चकृम करोतु मा मनेनसꣳ स्वाहा ॥ १४

(अग्नये गार्हपत्याय इदं नमम)

दिविजाता अप्सु जाता या जाता ओषधीभ्यः ।

अथो या अग्निजा आप स्ता नश्शुन्धन्तु शुन्धनी स्स्वाहा ॥

(अद्भ्यः शुन्धनीभ्यः इदं नमम)

यदापो नक्तं न्दुरित श्चराम यद्वा दिवा नूतन य्यत्पुराणम् ।

हिरण्यवर्णा स्तत उत्पुनीत न स्स्वाहा ॥ १६

(अद्भ्यो हिरण्यवर्णाभ्यः इदं नमम)

इमं मे वरुण श्रुधी हव मद्या च मृळय ।

त्वा मवस्यु राचके स्वाहा ॥ १७

(वरुणाय इदं नमम)

तत्त्वा यामि ब्रह्मणा वन्दमान-

स्तदाशास्ते यजमानो हविर्भिः ।

अहेळमानो वरुणेह बोध्युरुशꣳस

मान आयुः प्रमोषी स्स्वाहा ॥ १८

(वरुणाय इदं नमम)

त्वन्नो अग्ने वरुणस्य विद्वा-

न्देवस्य हेळोऽव यासिसीष्ठाः ।

यजिष्ठो वह्नितम श्शोशुचानो विश्वा

द्वेषाᳪसि प्रमुमुग्ध्यस्म थ्स्वाहा ॥ १९

(अग्नये इदं न मम)

स त्वन्नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ।

अवयक्ष्व नो वरुणᳪ रराणो वीहि मृळीकᳪ सुहवोन एधि स्वाहा ॥

(अग्नये इदं न मम)

त्वमग्ने अयास्ययास न्मनसा हितः ।

अयासन् हव्यमूहिषेऽयानो धेहि भेषजᳪ स्वाहा ॥ २१

(अग्नये अयसे इदं न मम)

यदर्दीव्य न्नृणमहं बभूवादित्सन्वा सञ्जगर जनेभ्यः ।

अग्निर्मा तस्मादिन्द्रश्च सव्विदानौ प्रमुञ्चताᳪ स्वाहा ॥ २२

(अग्नीन्द्राभ्यां इदं न मम)

यद्धस्ताभ्याञ्चकर किल्बिषाण्यक्षाणां व्वग्नु मुपजिघ्नमानः ।

उग्रंपश्याच राष्ट्रभृच्च तान्यफ्सरसा वनुदत्ता मृणानि स्वाहा ॥

(उग्रंपश्यायै राष्ट्रभृते च अफ्सरोभ्यां इदं न मम)